रघुवंश:

५२१

नुसवर्त्मावन्ध्यः प्रतस्थे सनमंगलोदग्रतरप्रभावः ॥७१॥ श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ॥ य
यावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ॥७२॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्षितांगम् ॥
नेत्रैः पपुः तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ॥७३॥ पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद
मानः ॥ भुजे भुजंगेंद्रसमानसारे भूयः स भूमेर्धुरमाससंज ॥७४॥ अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरि
दिव तेजो वह्निनिष्ठ्यूतमैशम् ॥ नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः ॥
॥७५॥ इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ नंदनीवरप्रसादनो नाम द्वितीयः सर्गः ॥२॥ अथेप्सितं
भर्तुरुपस्थितोदयं सखीजनोद्वीक्षणकौमुदीमुखम् ॥ निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा दौहृदलक्षणं
दधौ ॥१॥ ततो विशांपत्युरनन्यसंततेर्मनोरथं किंचिदिवोदयोन्मुखम् ॥ अनन्यसौहार्दरसस्य दोहृदं प्रिया प्रपेदे

प्रकृतिप्रियंवदा ॥ १ ॥ शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपाण्डुना । तनुप्रकाशेन विचेयतारका प्रभा
ॐ तकल्पा शशिनेव शर्वरी ॥ २ ॥ मुखेन सा केतकपत्रपाण्डुना कृशांगयष्टिः परिमेयभूषणा । स्थिताल्पतारां करुणेन्दु
र॰ वं॰ मण्डलां विभातकल्पां रजनीं व्यडंबयत् ॥ ४ ॥ तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ॥ करीव
११ सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ॥ ५ ॥ दिवं मरुत्वानिव भोक्ष्यते भुवं दिगन्तविश्रान्तरथो
॥ हि तत्सुतः । अतोभिलाषे प्रथमं तथाविधे मनो बबंधान्यरसान्विलंघ्य सा ॥ ६ ॥ न मे ह्रिया शंसति किंचिदी
प्सितं स्पृहावती वस्तुषु केषु मागधी । इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्तरकोशलेश्वरः ॥ ७ ॥ उपेत्य
सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतम् ॥ न हीष्टमस्य त्रिदिवेपि भूपतेरभूदनासाद्यमधिज्यधन्व राम:
नः ॥ ८ ॥ क्रमेण निस्तीर्य च दोहदव्यथां प्रचीयमानावयवा रराज सा ॥ पुराणपत्रापगमादनंतरं लतेव संनद्धम ११

नोग्निमपह्नुवा ॥ ९ ॥ निधानगर्भामिव सागरांबरां शमीमिवाभ्यंतरलीनपावकाम् ॥ नदीमिवांतःसलिलां सरस्वतीं नृपः
ससत्वां महिषीममन्यत ॥ १ ॥ दिनेषु गच्छत्सु नितांतपीवरं तदीयमानीलमुखं स्तनद्वयम् ॥ तिरश्चकार भ्रमरावलीढयोः
सुजातयोः पंकजकोशयोः श्रियम् ॥ ११ ॥ दिनेषु गच्छत्सु धूकपांडुरं तदीयमास्याममुखं स्तनद्वयम् ॥ समुद्गयोर्वा
रणदंतकोशयोर्बभार कांतिं नवलापिधानयोः ॥ १२ ॥ प्रियानुरागस्य मनःसमुन्नतेर्भुजार्जितानां च दिगंतसंप
दाम् ॥ यथाक्रमं पुंसवनादिकाः क्रियाः धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥ १३ ॥ सुरेंद्रमात्राश्रितगर्भगौरवात्प्रयत्न
मुक्तासनया गृहागतः ॥ तयोपचारांजलिखिन्नहस्तया ननंद पारिप्लवनेत्रया नृपः ॥ १४ ॥ कुमारभृत्याकुशलै
वेश्मनि: रधिष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि ॥ पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श काले दिवमभ्रितामिव ॥ १५ ॥
ग्रहैस्ततः पंचभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसंपदम् ॥ असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवा

थमक्षयम् ||१६|| दिशः प्रसेदुर्मरुतो ववुः सुखाः प्रदक्षिणार्चिर्हविरग्निराददे || बभूव सर्वं शुभशंसि तत्क्षणं भवो हि
ॐ लोकाभ्युदयाय तादृशाम् ||१७|| अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा || निशीथदीपाः सहसा
र॰ वं॰ हतत्विषो बभूवुरालेख्यसमर्पिता इव ||१८|| जनाय शुद्धान्तचराय शंसते कुमारजन्मामृतसंमिताक्षरम् || अदेयमासी
१२ त्त्रयमेव भूपतेः शशिप्रभं छत्रमुभे च चामरे ||१९|| स वीक्ष्य पुत्रस्य चिरान्मुखं पिता निधानकुंभस्य युवेव दुर्गतः ||
१२ मुदा शरीरे प्रबभूव नात्मनः पयोधिरिंदूदयमूर्छितो यथा ||२०|| निवातपद्मस्तिमितेन चक्षुषा नृपस्य कांतं पि
बतः सुताननम् || महोदधेः पूर इवेंदुदर्शनाद्गुरुः प्रहर्षः प्रबभूव नात्मनि ||२१|| स जातकर्मण्यखिले तप राम॰
स्विना तपोवनादेत्य पुरोधसा कृते || दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ||२२|| सुखश्र १२
वा मंगलतूर्यनिःस्वनाः प्रमोदनृत्यैः सहवारयोषिताम् || न केवलं सद्मनि मागधीपतेः पथि व्यजृंभंत दिवौ

कसामपि ॥२०॥ नसंयतस्तस्य बभूव रक्षितुर्विमोचयेद्यं सुतजन्महर्षितः ॥ ऋणाभिधानात्स्वयमेव केवलं तदापि
तृणां मुमुचे स बंधनात् ॥२१॥ श्रुतस्य यायादयमंतमर्भकस्तथापरेषां युधि चेति पार्थिवः ॥ अवेक्ष्य धातोर्गमना
र्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ॥२२॥ पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने ॥ पुपो
ष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचंद्रमाः ॥२३॥ उमावृषांकौ शरजन्मना यथा यथा जयंतेन शचीपुरंदरौ ॥ त
था नृपः सा च सुतेन मागधी ननंदतुस्तत्सदृशेन तत्समौ ॥२४॥ रथांगनाम्नोरिव भाववंधनं बभूव यत्प्रेम परस्प
राश्रयम् ॥ विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत ॥२५॥ उवाच धात्र्या प्रथमोदितं वचो ययौ त
दीयामवलंब्य चांगुलिम् ॥ अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥२६॥ तमंकमारो
प्य शरीरयोगजैः सुखैर्निषिंचंतमिवामृतं त्वचि ॥ उपांतसंमीलितलोचनो नृपश्चिरं सुतस्पर्शरसज्ञतां यय

ॐ

र.वं.

१३

13

ये ॥२६॥ अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमंतमन्वयम् ॥ स्वमूर्त्तिभेदेन गुणाग्र्यवर्त्तिना पतिः
प्रजानामिव सर्गमात्मनः ॥२७॥ स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ॥ लिपेर्यथावद्ग्र
हणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥२८॥ अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरु
प्रियम् ॥ अवंध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ॥२९॥ ~~धियः सपतिभिर्दिशो हरिद्भिरित~~
मि ॥ धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः ॥ ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भि
र्हरितामिवेश्वरः ॥३०॥ त्वचं स मेध्यां परिधाय रौरवीमशिक्षतास्त्रं पितुरेव मंत्रवत् ॥ न केवलं तद्गुरुरेकपार्थि राम:
वः क्षितावभूदेकधनुर्द्धरोऽपि सः ॥३१॥ महोक्षतां वत्सतरः स्पृशन्निव द्विपेंद्रभावं कलभः श्रयन्निव रघुः ॥ १३
क्रमाद्यौवनभिन्नशैशवः पुपोष गांभीर्यमनोहरं वपुः ॥३२॥ अथास्य गोदानविधेरनंतरं विवाहदीक्षां निरवर्त्त

यज्ञकृतः ॥ नरेंद्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः ॥३७॥ युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः ॥ वपुःप्रकर्षादजयद्गुरुं रघुस्तथापि नीचैर्विनयाददृश्यत ॥३८॥ ततः प्रजानां चिरमात्मना धृतां नितांतगुर्वीं लघयिष्यता धुरम् ॥ निसर्गसंस्कारविनीत इत्यसौ नृपेण चक्रे युवराजशब्दभाक् ॥३९॥ नरेंद्रमूलायतनादनंतरं तदास्पदं श्रीर्युवराजसंज्ञितम् ॥ अगच्छदंशेन गुणाभिलाषिणी नवावतारं कमलादिवोत्पलम् ॥४०॥ विभावसुः सारथिनेव वायुना घनव्यपायेन गभस्तिमानिव ॥ बभूव तेनातितरां सुदुःसहः कटप्रभेदेन करीव पार्थिवः ॥४१॥ नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् ॥ अपूर्णमेकेन शतक्रतूपमः शतं क्रतूनामपविघ्नमाप सः ॥४२॥ अतः परं तेन मखाय यज्वना तुरंगमुत्सृष्टमनर्गलं पुनः ॥ धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः किल गूढविग्रहः ॥४३॥ विषादलुप्तप्रतिपत्ति

ॐ
र॰वं॰
१४
14

विस्मितंकुमारसैन्यंसपदिस्थितंचतत् ॥ वसिष्ठधेनुश्चयदृच्छयागताश्रुतप्रभावाददृशेथनंदिनी ॥४४॥ त
दंगनिष्यंदजलेनलोचनेप्रमृज्यपुण्येनपुरस्कृतःसताम् ॥ अतींद्रियेष्वप्युपपन्नदर्शनोबभूवभावेषुदि
लीपनंदनः ॥४५॥ सपूर्वतःपर्वतपक्षशातनंददर्शदेवंनरदेवसंभवः ॥ पुनःपुनःसूतनिषिद्धचापलं
हरंतमश्वंरथरश्मिसंयतम् ॥४६॥ शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिंविदित्वाहरिभिश्चवाजिभिः ॥ अवो
चदेनंगगनस्पृशारघुःस्वरेणधीरेणनिवर्त्तयन्निव ॥४७॥ मखांशभाजांप्रथमोमनीषिभिस्त्वमेवदेवेंद्रसदानिग
द्यसे ॥ अजस्रदीक्षाप्रयतस्यमद्गुरोःक्रियाविघातायकथंप्रवर्त्तसे ॥४८॥ त्रिलोकनाथेनसतांमखद्विष
स्त्वयानियम्याननुदिव्यचक्षुषा ॥ सचेत्स्वयंकर्मसुधर्मचारिणांत्वमंतरायोभवसिच्युतोविधिः ॥४९॥
तदंगमग्र्यंमघवन्महाक्रतोरमुंतुरंगंप्रतिमोक्तुमर्हसि ॥ पथःश्रुतेर्दर्शयितारईश्वरामलीमसामा

दाम:
१४

ददत्तेन पाङ्गितिमू ॥५०॥ इति प्रगल्भं रघुणा समीरितं वचो निशम्याधिपतेर्दिवौकसाम् ॥ निवर्त्तयामास रथं सवि-
स्मयः प्रचक्रमे च प्रतिवक्तुमुत्तरम् ॥५१॥ यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः ॥ ज-
गत्प्रकाशं तदशेषमिज्यया भवद्गुरोर्लंघयितुं ममोद्यतः ॥५२॥ हरिर्यथैकः पुरुषोत्तमः स्मृतो महेश्वरस्त्र्यम्बक
एव नापरः ॥ तथा विदुर्मां मुनयः शतक्रतुं द्वितीयगामी न हि शब्द एष नः ॥५३॥ अतोयमश्वः कपिलानुका-
रिणा पितुस्त्वदीयस्य मयापहारितः ॥ अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सगरस्य संततेः ॥५४॥ त-
तः प्रहस्याह पुनः पुरंदरं व्यपेतभीर्भूमिपुरंदरात्मजः ॥ गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं
कृती भवान् ॥५५॥ स एवमुक्त्वा मघवंतमुन्मुखः करिष्यमाणः सशरं शरासनम् ॥ अतिष्ठदालीढविशेष-
शोभिना वपुःप्रकर्षेण विडंबितेश्वरः ॥५६॥ रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ॥

मा निधा मा निधे हि निषीद धाते लोड्

ततः प्रहस्यापभयः पुरंदरं पुनर्बभाषे तुरगस्य रक्षिता

उचितः परिचितः =८

ॐ नवांबुदानीकमुहूर्त्तलांछने धनुष्यमोघं समधत्त सायकम् ॥५७॥ दिलीपसूनोः स बृहद्भुजांतरं प्रविश्य भीमा
र०वं० सुरशोणितोचितः ॥ पपावनास्वादितपूर्वमाशुगः कुतूहलेनेव मनुष्यशोणितं ॥५८॥ हरेकुमारोपि कुमार
१५ विक्रमः सुरद्विपास्फालनकर्कशांगुलौ ॥ भुजे शचीपत्रविशेषकांकिते स्वनामचिन्हं निचखान सायकम् ॥५९॥
15 जहार चान्येन मयूरपत्रिणा शरेण शक्रस्य महाशनिध्वजम् ॥ चुकोप तस्मै स भृशं सुरश्रियः प्रसह्य केशव्य
परोपणादिव ॥६०॥ तयोरुपांतस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः ॥ बभूव युद्धं तुमुलं जयैषिणो
रधोमुखैरूर्ध्वमुखैश्च पत्रिभिः ॥६१॥ अतिप्रबंधप्रहितास्त्रवृष्टिभिस्तमाश्रयं दुःप्रसहस्य तेजसः ॥ शशाकनि राम:
र्वापयितुं न वासवः स्वतश्च्युतं वन्हिमिवाद्भिरंबुदः ॥६२॥ ततः प्रकोष्ठे हरिचंदनांकिते प्रमथ्यमानार्णव १५
धीरनादिनीम् ॥ रघुः शशांकार्द्धमुखेन पत्रिणा शरासनज्यामलुनाद्बिडौजसः ॥६३॥ स चापमुत्सृज्य वि

द्वि रघु

वृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः ॥ महीध्रपक्षव्यपरोपणोद्धतं स्फुरत्प्रभामंडलमस्त्रमाददे ॥६४॥

॥ रघुर्भृशं वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः ॥ निमेषमात्रादवधूय तद्व्यथां सहोत्थितः सैनिक

हर्षनिःस्वनैः ॥६५॥ तथापि शस्त्रव्यवहारनिष्ठुरे विपक्षभावे चिरमस्य तस्थुषः ॥ तुतोष वीर्यातिशयेन वृत्र

हा पदं हि सर्वत्र गुणैर्निधीयते ॥६६॥ असंगमद्रिष्वपि सारवत्तया न मे त्वदन्येन विसोढमायुधम् ॥ अवे

हि मां प्रीतमृते तुरंगमात्किमिच्छसीति स्फुटमाह वासवः ॥६७॥ ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरं

जितांगुलिम् ॥ दिलीपसूनुः प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरम् ॥६८॥ अमोच्यमश्वं यदि म

न्यसे प्रभो ततः समाप्ते विधिनैव कर्मणि ॥ अजस्रदीक्षाप्रयतः स मद्गुरुः क्रतोरशेषेण फलेन युज्यताम्

॥६९॥ यथा च वृत्तान्तमिमं सदोगतः त्रिलोचनैकांशतया दुरासदः ॥ तवैव संदेशहराद्विशांपतिः शृणो

ॐ त्तिर्देवेंद्र तथा विधीयताम् ।।७०।। तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्ययौ ।। नृपस्य नातिप्र
र॰वं मनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्त्तत ।।७१।। तमभ्यनंदत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हृ
१६ रेः ।। परामृशन्हर्षजडेन पाणिना तदीयमंगं कुलिशव्रणांकितम् ।।७२।। इति क्षितीशो नवतिं नवाधिकां म
16 हाक्रतूनां महनीयशासनः ।। समारुरुक्षुर्दिवमायुषः क्षये ततान सोपानपरंपरामिव ।।७३।। अथ स
विषयव्यावृत्तात्मा यथाविधि सूनवे नृपतिककुदं दत्वा यूने सितातपवारणम् ।। मुनिवनतरुच्छायां
देव्या तया सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ।।७४।। इति श्रीरघुवंशे महाकाव्ये राम:
कालिदासकृतौ तृतीयः सर्गः ।। स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।। दिनांते निहितं तेजः सवित्रेव हु १५
ताशनः ।।१।। न्यस्तशस्त्रं दिलीपं च शुश्रुवुषां पतिम् ।। राज्ञामुद्धृतनाराचे हृदि शल्यमिवार्पितम् ।।२।। पु

नार्यो न जग्मुर्विषयांतराणि॥ तथा हि शेषेंद्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा॥१२॥ स्थाने वृता भूप
तिभिः परोक्षैः स्वयंवरं साधुममंस्त भोज्या॥ पद्मेव नारायणमन्यथासौ लभेत कांतं कथमात्मतुल्यं॥१३॥ पर
स्परेण स्पृहणीयशोभं नचेदिदं द्वंद्वमयोजयिष्यत्॥ अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां वित
थोऽभविष्यत्॥१४॥ रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथा हि बाला॥ गतेयमात्मप्रतिरूपमेवं मनो
हि जन्मांतरसंगतिज्ञं॥१५॥ इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन्कथाः श्रोत्रसुखाः कुमारः॥ उद्भासितं मंग
लसंविधाभिः संबंधिनः सद्म समाससाद॥१६॥ ततोवतीर्याशु करेणुकायाः स कामरूपेश्वरदत्तहस्तः॥ वैदर्भ ६६
निर्दिष्टमथो विवेश नारीमनांसीव चतुष्कमंतः॥१७॥ महार्हसिंहासनसंस्थितोसौ सरत्नमर्घ्यं मधुपर्कमिश्रं
भोजोपनीतं च दुकूलयुग्मं जग्राह सार्धं वनिताकटाक्षैः॥१८॥ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोधर
क्षैः॥ वेलासकाशं स्फुटफेनराजिः नवैरुदन्वानिव चंद्रपादैः॥१९॥ तत्रार्चितो भोजपतेः पुरोधा हुत्वाग्निमा
ज्या

ज्यादिभिरग्निकल्पः॥ तमेव चाधाय विवाहसाक्ष्ये वधूवरौ संगमयां चकार॥ २०॥ हस्तेन हस्तं परिगृह्य वध्वाः

स राजसूनुः सुतरां विभासे॥ अनंतराशोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन॥ २१॥ आसीद्वरः

कंटकितप्रकोष्ठः स्विन्नांगुलिः संववृते कुमारी॥ तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव म

नोभवेन॥ २२॥ तयोरपांगप्रतिसारितानि क्रियासमापत्तिनिवर्तितानि॥ ह्रीयंत्रणामानशिरे

मनांसि मन्योन्यलोलानि विलोचनानि॥ २३॥ प्रदक्षिणप्रक्रमणात्कृशानोरुदर्चिषस्तन्मिथुनं विभा

से॥ मेरोरुपांतेष्विव वर्तमानमन्योन्यसंसक्तमहस्त्रियामं॥ २४॥ नितंबगुर्वी गुरुणा प्रयुक्ता वधूर्विधा

तृप्रतिमेन तेन॥ चकार सा मत्तचकोरनेत्रा लज्जावती लाजविसर्गमग्नौ॥ २५॥ हविः शमीपल्लवलाज

गंधिः पुण्यः कृशानोरुदियाय धूमः॥ कपोलसंसर्पिशिखः स तस्या मुहूर्तकर्णोत्पलतां प्रपेदे॥ २६॥ ३४

तदंजनक्लेदसमाकुलाक्षं प्रम्लानबीजांकुरकर्णपूरं॥ वधूमुखं पाटलगंडलेखमाचारधूमग्रहणाद्बभू

व ॥२७॥ तौस्नातकौबंधुमताचराज्ञापुरंध्रिभिश्चक्रमशःप्रयुक्तं ॥ कन्याकुमारौकनकासनस्थावार्द्राक्षतारोपणमन्वभू-
तां ॥२८॥ इतिस्वसुर्भोजकुलप्रदीपःसंपाद्यपाणिग्रहणंसराजा ॥ महीपतीनांपृथगर्हणार्थंसमादिदेशाधिकृता-
नधिश्रीः ॥२९॥ लिंगैर्मुदःसंवृतविक्रियास्तेह्रदाःप्रसन्नाइवगूढनक्राः ॥ वैदर्भमामंत्र्यययुस्तदीयांप्रत्यर्प्यपूजा-
मुपदाछलेन ॥३०॥ सराजलोकःकृतपूर्वसंविदारंभसिद्धौसमयोपलभ्यं ॥ आदास्यमानःप्रमदामिषंतदावृत्य
पंथानमजस्यतस्थौ ॥३१॥ भर्तापितावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः ॥ सत्वानुरूपाहरणीकृतश्रीः
प्रास्थापयद्राघवमन्वगाच्च ॥३२॥ तिस्रस्त्रिलोकीप्रथितेनसार्धमजेनमार्गेवसतीरुषित्वा ॥ तस्मादपावर्ततकुंडि- पा
नेशःपर्वात्ययेसोमइवोष्णरश्मेः ॥३३॥ प्रमन्यवःप्रागपिकोशलेन्द्रेप्रत्येकमात्तस्वतयाबभूवुः ॥ अतोनृपाश्चक्ष-
मिरेसमेताःस्त्रीरत्नलाभंनतदात्मजस्य ॥३४॥ तमुद्वहंतंपथिभोजकन्यांरुरोधराजन्यगणःसदृप्तः ॥ बलि-
प्रदिष्टांश्रियमाददानंत्रैविक्रमंपादमिवेंद्रशत्रुः ॥३५॥ तस्याःसरक्षार्थमनल्पयोधमादिश्यपित्र्यंसचिवंकु-

संविद् पूर्वप्रतिज्ञायां संकेते [illegible] नामस्विति केशवः

नृपाः जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते

आमिषं [illegible] केशवः = ४ हरणं कन्यादेयं धनं यौतकादि [illegible]

द्वन्द्वः कलहो येषां द्वंद्विनो योधाः
द्वंद्वं कलहयुग्मयोरित्यमरः

सारः॥ प्रत्यग्रहीत्पार्थिववाहिनीं तां भागीरथीं शोण इवोत्तरंगः॥३६॥ पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगा
ॐ धिरूढं॥ यंता गजस्याभ्यपतद्गजस्थं तुल्यप्रतिद्वंद्वि बभूव युद्धं॥३७॥ नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयंति
र०वं० स्म कुलोपदेशान्॥ बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः॥३८॥ उत्थापितः संयति रेणु
३५ रश्वैः सान्द्रीकृतः स्यंदनवंशचक्रैः॥ विस्तारितः कुंजरकर्णतालैर्नेत्रक्रमेणोपरुरोध सूर्यं॥३९॥ मत्स्यध्वजा
वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि॥ बभुः पिबंतः परमार्थमत्स्याः पर्याविलानीव नवोदकानि॥४०॥
रथो रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः॥ स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबो
धः॥४१॥ आवृण्वतो लोचनमार्गमाजौ रजोंधकारस्य विजृंभितस्य॥ शस्त्रक्षताश्वद्विपवीरजन्मा बालारु
णोभूद्रुधिरप्रवाहः॥४२॥ स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः॥ अंगारशेषस्य हुता रा०
शनस्य पूर्वोत्थितो धूम इवाबभासे॥४३॥ प्रहारमूर्छापगमे रथस्था यंतॄनुपालभ्य निवर्तिताश्वान्॥ यैः सा ३५

ष्विनां शान्धितपूर्वकेतुन्तस्मान्नेवसामर्थ्यतयानिनैजः ॥४४॥ अर्धपदैर्मार्गैपरिवारणानां छूनाधनुर्भृतां हस्तवतां पृषत्काः
संप्रापुरेवात्मजवानुवृत्यापूर्वार्द्धभागैः फलिभिः शरव्यं ॥४५॥ आधोरणानां गजसंनिपाते शिरांसि चक्रैर्नि
शितैः क्षुराग्रैः ॥ हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण पेतुः ॥४६॥ पूर्वं प्रहर्त्ता न जघान भूयः प्रतिप्र
हाराक्षममश्वसादी ॥ तुरंगमस्कंधनिषण्णदेहं प्रत्याश्वसंतं रिपुमाचकांक्षे ॥४७॥ तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु
दंतेष्वसिभिः पतद्भिः ॥ उद्यंतमग्निं शमयांबभूवुर्गजा विविग्नाः करशीकरेण ॥४८॥ शिलीमुखोत्कृत्तशिरः
फलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव ॥ रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः ॥४९॥ उपा
न्तयोर्निःकुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रियापि ॥ केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचका
र ॥५०॥ कश्चिद्द्विषत्खड्गहृतोत्तमांगः सद्यो विमानप्रभुतामुपेत्य ॥ वामांगसंसक्तसुरांगनः स्वं नृत्यत्कबंधं

ॐ

र.व.

३६

36

प्रसमरे ददर्श ॥ ५१ ॥ अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् । व्यश्वौ गदाव्यायतसंप्रहारौ भग्ना
युधौ बाहुविमर्दनिष्ठौ ॥ ५२ ॥ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव । अमर्त्यभावेपि कयोश्चिदासी
देकाप्सरः प्रार्थितयोर्विवादः ॥ ५३ ॥ व्यूहावुभौ तावितरेतरस्माद्भङ्गं जयं चापतुरव्यवस्थं । पश्चात्पुरोमारुत
योः प्रवृद्धौ पर्यायवृत्त्येव महार्णवोर्मी ॥ ५४ ॥ परेण भग्नेपि बले महौजा ययावजः प्रत्यरिसैन्यमेव । धूमो
निवर्त्येत समीरणेन यतो हि कक्षस्तत एव वह्निः ॥ ५५ ॥ रथी निषङ्गी कवची धनुष्मान्दृप्तः स राजन्यकमेकवी
रः । विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवाम्भः ॥ ५६ ॥ स दक्षिणं तूणमुखेन वामं व्यापारय
न्हस्तमलक्ष्यताजौ । आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव बाणान्सुषुवे रिपुघ्नान् ॥ ५७ ॥ स रोषदष्टाधरलो
हितौष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः । तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ॥ ५८ ॥ सर्वै

वामं सव्ये प्रतीपे च दक्षिणे चापि सुंदरे ॥ इति विश्वः
राम:

३६

र्वस्तांगौरेर्द्विरदप्रधानैः सर्वायुधैः कंटकभेदि मिस्त्र ॥ सर्वास्वयत्नेन महीमिपालास्तस्मिन्नपि जहुर्युधि सर्वतस्व ॥ ५९ ॥
सास्त्रजैः छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः ॥ नीहारमग्नो दिनपूर्वभागः किंचित्प्रकाशेन विवस्वतेव ॥ ६० ॥
प्रियंवदात्प्राप्तमसौ प्रियार्हः प्रायुंक्त राजस्वधिराजसूनुः ॥ गांधर्वमस्त्रं कुसुमास्त्रकांतः प्रस्वापनं स्वप्ननिवृत्तलौ
ल्यः ॥ ६१ ॥ ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं ॥ तस्थौ ध्वजस्तंभनिषण्णदेहं निद्रावि
धेयं नरदेवसैन्यं ॥ ६२ ॥ ततः प्रियोपात्तरसेधरोष्ठे निवेश्य दध्मौ जलजं कुमारः ॥ तेन स्वहस्तार्जितमेकवीरः ॥
पिबन्यशो मूर्त्तमिवाबभासे ॥ ६३ ॥ शंखस्वनाभिज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः ॥ निमीलिता
नामिव पंकजानां मध्ये स्फुरंतं प्रतिमाशशांकं ॥ ६४ ॥ सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु पा
र्थिवानां ॥ यशो हृतं संप्रति राघवेन न जीवितं वः कृपयेति वर्णाः ॥ ६५ ॥ स चापकोटीनिहितैकबाहुः शि
पत्रःकौ ह्यानिलित्र रकवाक्यैन

श्रीं
र॰वं॰
३७

स्त्रनिष्कर्षणभिन्नमौलिः ॥ ललाटबद्धश्रमवारिबिंदुर्भीतांप्रियामेत्यवचोबभाषे ॥ ६६ ॥ इतः परानर्भकहा
र्यशस्त्रान्वैदर्भिपश्यानुमतामयासि ॥ एवंविधेनाहवचेष्टितेन त्वंप्रार्थ्यसेहस्तगताममैभि ॥ ६७ ॥ तस्याः
प्रतिद्वंद्विकृताद्विषादात्सद्योविमुक्तंमुखमाबभासे ॥ निश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमिवा बाष्पोनेत्रजलोष्मा तोहिनिविडः
त्मदर्शः ॥ ६८ ॥ हृष्टापिसाह्रीविजितानसाक्षाद्वाग्भिःसखीनांप्रियमभ्यनंदत् ॥ स्थलीनवांभःपृषताभिवृ
ष्टामयूरकेकाभिरिवाभ्रजातं ॥ ६९ ॥ इतिशिरसिसवामंपादमाधायराज्ञामुदवहदनुरूपामात्मनस्तांकु
मारीं ॥ रथतुरगरजोभिस्तस्यरूक्षालकाग्रासमरविजयलक्ष्मीःसैवमूर्त्ताबभूव ॥ ७० ॥ प्रथमपरिगतार्थ रामः
स्तंरघुःसन्निवृत्तंविजयिनमभिनंद्यश्लाघ्यजायासमेतं ॥ तदुपहितकुटुंबः शान्तिमार्गोत्सुकोभून्नहिसति ३७
कुलधुर्येसूर्यवंश्यागृहाय ॥ ७१ ॥ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौअजविजयोनामसप्तमःसर्गः ७ ॥

अथ तस्य विवाहकौतुकं ललितं बिभ्रत एव पार्थिवः ॥ वसुधामपि हस्तगामिनीमकरोदिन्दुमतीमिवापराम् ॥ १ ॥ दु
रितैरपि कर्तुमात्मसात्प्रयतन्ते नृपसूनवो हि यत् ॥ तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया ॥ २ ॥
अनुभूय वसिष्ठसंभृतैः सलिलैस्तेन सहाभिषेचनम् ॥ विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थतामिव ॥ ३ ॥
स बभूव दुरासदः परैः गुरुणाथर्वविदा कृतक्रियः ॥ पवनाग्निसमागमो ह्ययं सहितं ब्रह्म यदस्त्रतेजसा ॥ ४ ॥
रघुमेव निवृत्तयौवनं तममन्यन्त नरेश्वरं प्रजाः ॥ स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान्गुणानपि ॥ ५ ॥
अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव संगतम् ॥ पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनम् ॥ ६ ॥
सदयं बुभुजे महाभुजः सहसोद्वेगमियं व्रजेदिति ॥ अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ॥ ७ ॥
अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत् ॥ उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित् ॥ ८ ॥

पदवीं परिणामदेशितां रघुराप्त्वनान्तगामिनीम् =

विष =

ॐ नखरो नचभूयसा मृदुः पवमानः पृथिवीरुहानिव ॥ स पुरस्कृतमध्यमक्रमो नमयामास नृपाननुद्धरन् ॥१०॥

र० वं० अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया ॥ विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निस्पृहो

भवत् ॥११॥ गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः ॥ पदवीं तरुवल्कवाससां प्रयताः सं यतीनां =

३८ यमिनां प्रपेदिरे ॥११॥ तमरण्यसमाश्रयोन्मुखं शिरसा वेष्टनशोभिना सुतः ॥ पितरं प्रणिपत्य पादयो

38 रपरित्यागमयाचतात्मनः ॥१२॥ रघुरश्रुमुखस्य तस्य तत्कृतवानीप्सितमात्मजप्रियः ॥ न तु सर्प इव

त्वचं पुनः प्रतिपेदे व्यपवर्जितां श्रियम् ॥१३॥ स किलाश्रममन्त्यमाश्रितो निवसन्नावसथे पुराद्बहिः ॥ रामः

समुपास्यत पुत्रभोग्यया स्नुषयेवाविकृतेन्द्रियः श्रिया ॥१४॥ प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूत ३८

नेश्वरम् ॥ नभसा निभृतेन्दुना तुलामुदितार्केण समारुरोह तत् ॥१५॥ यतिपार्थिवलिंगधारिणौ दद

प्रान्तेरघुराघवौजनैः ॥ अपवर्ग्गमहोदयार्थयोर्भुवमंशाविवधर्म्मयोर्गतौ ॥ १६ ॥ अजिताधिगमाय मंत्रिभिर्युयुजे
नीतिविशारदैरजः ॥ अनपायिपदोपलब्धये रघुराप्तैः समियाय योगिभिः ॥ १७ ॥ सममेकृहात्तभूपती युवा ससचिवैः प्रत्य
हमैर्थसिद्धये ॥ अपुनर्जननोपपत्तये प्रवयाः संयमिभिर्म्मनीषिभिः ॥ १८ ॥ नृपतिः प्रकृतीरवेक्षितुं व्यवहारा
सनमाददे युवा ॥ परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरम् ॥ १९ ॥ अनयत्प्रभुशक्तिसंपदा वशमेको
नृपतीननंतरान् ॥ अपरः प्रणिधानयोग्यया मरुतः पंच शरीरगोचरान् ॥ २० ॥ नयचक्षुरजो दिदृक्षया परं
ध्रस्य ततान मंडले ॥ हृदये समरोपयन्मनः परमं ज्योतिरवेक्षितुं रघुः ॥ २१ ॥ अकरोदचिरेश्वरः क्षितौ द्विष
दारंभफलानि भस्मसात् ॥ इतरो दहने स्वकर्म्मणां ववृते ज्ञानमयेन वह्निना ॥ २२ ॥ पणबंधमुखान्गुणानजः
षडुपायुंक्त समीक्ष्य तत्फलम् ॥ रघुरप्यजयद्गुणत्रयं प्रकृतिस्थं समलोष्टकांचनः ॥ २३ ॥ न नवः प्रभुराफलो
दयात् स्थिरकर्म्मा विरराम कर्म्मणः ॥ न च योगविधेर्नवेतरः स्थिरधीरापरमार्थदर्शनात् ॥ २४ ॥ इतिशत्रुषु

ॐ
र० वं०
३९

वैडियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ ॥ प्रसृतावुद्यतापवर्गयोरुभयीं सिद्धिमुभाववापतुः ॥२५॥ अथ काश्चिदजव्य
पेक्षया गमयित्वा समदर्शनः समाः ॥ तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः ॥२६॥ श्रुतदेहविसर्ज
नः पितुश्चिरमश्रूणि विमुच्य राघवः ॥ वितताननसमं पुरोधसा क्रतुमंतं पृथिवीशतक्रतोः ॥२७॥ अकरो
च्चतदौर्ध्वदेहिकं पितृभक्त्या पितृकार्यकल्पवित् ॥ नहि तेन पथा तनुत्यजस्तनयावर्जितपिंडकांक्षिणः ॥२८॥
सपरार्ध्यगते रशोच्यतां पितुरुद्दिश्य सदर्थवेदिभिः ॥ शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनं
जगत् ॥२९॥ क्षितिरिंदुमती च भामिनी पतिमासाद्य तमग्र्यपौरुषम् ॥ प्रथमा बहुरत्नसूरभूदपरा वीरम
जीजनत्सुतम् ॥३०॥ दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम् ॥ दशपूर्वरथं यमाख्यया दशकंठा रामः
रिगुरुं विदुर्बुधाः ॥३१॥ ऋषिदेवगणस्वधाभुजां श्रुतयागप्रसवैः सपार्थिवः ॥ अनृणत्वमुपेयिवान्बभौ ३९
परिधेर्मुक्त इवोष्णदीधितिः ॥३२॥ बलमार्तभयोपशांतये विदुषां सन्नतये बहु श्रुतं ॥ वसु तस्य विभोः

नैकेन संगृहीतं वर्त्तापि परस्परयोजनम् ॥ ३३ ॥ स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुसंयतः ॥ नागरोपवने शचीसख

रो मरुतां पालयितेव नंदने ॥ ३४ ॥ अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् ॥ उपवीणयितुं ययौ

रवेरुदयावृत्तिपथेन नारदः ॥ ३५ ॥ कुसुमैर्ग्रथितामपार्थिवैः स्रजमातोद्यशिरोनिवेशिताम् ॥ अहरत्किल तस्य

वेगवानधिवासस्पृहयेव मारुतः ॥ ३६ ॥ भ्रमरैः कुसुमानुसारिभिर्विनिकीर्णपरिवादिनी मुनेः ॥ ददृशे पवनाव

लेपजं सृजती वाष्पमिवाञ्जनाविलम् ॥ ३७ ॥ अभिभूय विभूतिमार्तवीं मधुगंधातिशयेन वीरुधाम् ॥ नृपतेरम

रस्रगाप सा दयितोरस्तनकोटिसुस्थितिम् ॥ ३८ ॥ क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ॥ निमि

मीलनरोत्तमप्रिया हृतचंद्रा तमसेव कौमुदी ॥ ३९ ॥ वपुषा करणोज्झितेन सा निपतंती पतिमप्यपातयत् ॥ न

नु तैलनिषेकविंदुना सह दीपार्चिरुपैति मेदिनीम् ॥ ४० ॥ सममेव नराधिपेन सा गुरुसंमोहविलुप्तचेतसा

अगमत्सह तैलविंदुना नवदीपार्चिरिव क्षितेस्तलम् ॥ ४१ ॥ उभयोः परिपार्श्ववर्त्तिनां तुमुलेनार्त्तरवेण

श्री
र० वं०
४०
40

वैजिताः ॥ विहगाः कमलाकराश्रयाः समदुःखा इव तत्र चुक्रुशुः ॥ ४२ ॥ नृपतेर्व्यजनादिभिस्तमो नुनुदे सा तु त
थैव संस्थिता ॥ प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते ॥ ४३ ॥ प्रतियोजयितव्यवल्लकीसमव
स्थामथ सत्त्वविक्रियाम् ॥ स निनाय नितान्तवत्सलः परिगृह्योचितमंकमंगनाम् ॥ ४४ ॥ पाठांतरं ॥ पतिरंक
निषण्णया तया करणापायविभिन्नवर्णया ॥ समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चंद्रमाः ॥ ४५
विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ॥ अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥ ४६ ॥
कुसुमान्यपि गात्रसंगमात्प्रभवंत्यायुरपोहितुं यदि ॥ न भविष्यति हंत साधनं किमिवान्यत्प्रहरिष्यतो वि
धेः ॥ ४७ ॥ अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजांतकः ॥ हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं
मता ॥ ४८ ॥ अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ॥ यदनेन तरुर्न पातितः क्षपिता तद्विट
पाश्रया लता ॥ ४९ ॥ स्रगियं यदि जीवितापहा हृदये किं निहिता न हंति माम् ॥ विषमप्यमृतं क्वचिद्भवेद

राम:
४०

मतं यांविष्ठं [illegible] मीरुरेकया ॥ ५१ ॥ कृतवत्यसि नावधीरणामपराद्धेपि यदा चिरं मयि । कथमेकपदे निरागसं
जनमाभाष्यममुं न मन्यसे ॥ ५१ ॥ ध्रुवमस्मि शठः शुचिस्मिते विदितः कैतववत्सलस्तव । परलोकमसंनि
वृत्तये यदनापृच्छ्य गतासि मामितः ॥ ५२ ॥ दयितां यदि तावदन्वगाद्विनिवृत्तं किमिदं तया विना । सहतां हत
जीवितं मम प्रबलामात्मकृतां नु वेदनाम् ॥ ५३ ॥ सुरतश्रमसंभृतो मुखे ध्रियते स्वेदलवोद्गमोपि ते । अथ चास्त
मिता त्वमात्मना धिगिमां देहभृतामसारताम् ॥ ५४ ॥ मनसापि न विप्रियं मया कृतपूर्वं तव किं जहासि माम् ।
ननु शब्दपतिः क्षितेरहं त्वयि मे भावनिबंधना रतिः ॥ ५५ ॥ कुसुमोत्खचितान्वलीभृतश्चलयन्भृंगरुच
स्तवालकान् । करभोरु करोति मारुतस्त्वदुपावर्तनशंकि मे मनः ॥ ५६ ॥ तदपोहितुमर्हसि प्रिये प्रतिबोधेन
विषादमाशु मे । ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥ ५७ ॥ इदमुच्छ्वसितालकं मुखं तव वि
श्रान्तकथं दुनोति माम् । निशि सुप्तमिवैकपंकजं विरताभ्यंतरषट्पदस्वनम् ॥ ५८ ॥ शशिनं पुनरेति शर्व

री दयिता द्वंद्वचरं पतत्रिणम्॥ इति तौ विरहांतरक्षमौ कथमत्यंतगता न मां दहेः॥ ८९॥ नवपल्लवसंस्तरे
६ पि ते मृदु दूयेत यदंगमर्पितम्॥ तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम्॥ ९०॥ इयमप्रतिबो
१०.वं. धशायिनीं रशना त्वां प्रथमा रहःसखी॥ गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते॥ ९१॥ कलम
४१ न्यभृतासु भाषितं कलहंसीषु मदालसं गतं॥ पृषतीषु विलोलमीक्षितं पवनोद्धूतलतासु विभ्रमं॥ ९२॥
५१ त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया॥ विरहे तव मे गुरुव्यथं हृदयं न त्ववलंबितुं॥
क्षमाः॥ ९३॥ युग्मम्॥ मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ॥ अविधाय विवाहसत्क्रि
यामनयोर्गम्यत इत्यसांप्रतम्॥ ९४॥ कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति॥ अलकाभरणं राम:
कथं नु तत्तव नेष्यामि निवापमाल्यतां॥ ९५॥ स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम्॥ ४१
अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगात्रि शोच्यसे॥ ९६॥ तव निःश्वसितानुवादिभिर्बकुलैरर्द्ध
कारि ग्रथिता बकुलैः

चिंतां समं मया ॥ असमाप्य विलासमेखलां किमिदं किन्नरकंठि सुप्यते ॥ ६७ ॥ समदुःखसुखः सखीज
नः प्रतिपच्चंद्रनिभोयमात्मजः ॥ अहमेकरसस्तथापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ॥ ६८ ॥ धृतिरस्तमि
ता रतिश्च्युता विगतं गेयमृतुर्निरुत्सवः । गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥ ६९ ॥
गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ । करुणाविमुखेन मृत्युना हरता त्वां वद
किं न मे हृतं ॥ ७० ॥ युग्मम् ॥ मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे । अनुपास्यसि वाष्प
दूषितं परलोकोपनतं जलांजलिं ॥ ७१ ॥ विभवेपि सति त्वया विना सुखमेतावदजस्य गण्यतां । अहृतस्य
विलोभनांतरैर्मम सर्वे विषयास्त्वदाश्रयाः ॥ ७२ ॥ विलपन्निति कोशलाधिपः करुणार्थग्रथितं प्रियां प्रति
अकरोत्पृथिवीरुहानपि स्रुतशाखारसवाष्पदूषितान् ॥ ७३ ॥ अथ तस्य कथंचिदंकतः स्वजनस्तामपनीय
सुंदरीं ॥ विससर्ज तदंत्यमंडनामनलायागुरुचंदनैधसे ॥ ७४ ॥ प्रमदामनु संस्थितः शुचा नृपतिः सन्निति वाच्य

नं २१

दर्शनात् ॥ न चकार शरीरमग्निसात्सह देव्या न तु जीविताशया ॥ ७५ ॥ अथ तेन दशाहतः परे गुणशेषामुपदिश्य
श्री सुंदरीम् ॥ विदुषा विधयो महर्द्धयः पुर एवोपवने वितेनिरे ॥ ७६ ॥ स विवेश पुरीं तया विना क्षणदापायशशांक
र.वं. दर्शनः ॥ परिवाहमिवावलोकयन् स्वशुचः पौरवधूमुखाश्रुषु ॥ ७७ ॥ अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरु रु
४२ राश्रमस्थितः ॥ अभिषंगजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥ ७८ ॥ असमाप्तविधिर्यतो मुनि
स्तव विद्वानपि तापकारणम् ॥ न भवंतमुपस्थितः स्वयं प्रकृतौ स्थापयितुं कृतस्थितिः ॥ ७९ ॥ मयि तस्य सु
वृत्त वर्तते लघुसंदेशपदा सरस्वती ॥ शृणु विश्रुतसत्त्वसार तां हृदि चैनामुपधातुमर्हसि ॥ ८० ॥ पुरुषस्य पदे
लोकत्रयेषु ष्वजन्मनः समतीतं च भवच्च भावि च ॥ स हि निःप्रतिघेन चक्षुषा त्रितयं ज्ञानमयेन पश्यति ॥ ८१ ॥ चरतः रा.म.
किल दुश्चरं तपस्तृणबिंदोः परिशंकितः पुरा ॥ प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुरांगनाम् ॥ ८२ ॥ ४२
स तपःप्रतिबंधमन्युनाप्रमुखाविष्कृतचारुदर्शनाम् ॥ अशपद्भव मानुषीति तां शमवेलाप्रलयोर्मिणा

णांमुनिः ॥८३॥ भगवन्परवानयंजनः प्रतिकूलाचरितंक्षमस्वमे ॥ इतिचोपनतांक्षितिस्पृशंकृतवानासुरपुष्पद
र्शनात् ॥८४॥ क्रथकैशिकवंशसंभवातवभूत्वामहिषीचिरायसा ॥ मुनिशापनिवृत्तिकारणंस्वजनंमांसाधयंततः
स्तनुंजहौ ॥८५॥ तदलंतदपायचिंतयाविपदुत्पत्तिमतामुपस्थिता ॥ वसुधेयमुपेक्ष्यतांत्वयावसुमत्याहिनृपाः
कलत्रिणः ॥८६॥ उदयेयदवाप्यमुज्झताश्रुतमाविःकृतमात्मवत्त्वया ॥ मनसस्तदुपस्थितेज्वरेपुनरक्लीबतया
प्रकाश्यताम् ॥८७॥ रुदताकुतएवसापुनर्भवतानानुमृतापिलभ्यते ॥ परलोकजुषांस्वकर्मभिर्गतयो
भिन्नपथाहिदेहिनाम् ॥८८॥ अपशोकमनाःकुटुंबिनीमनुगृह्णीष्वनिवापदत्तिभिः ॥ स्वजनाश्रुकिला
तिसंततंदहतिप्रेतमितिप्रचक्षते ॥८९॥ मरणंप्रकृतिःशरीरिणांविकृतिर्जीवनमुच्यतेबुधैः ॥ क्षणमप्य
वतिष्ठतेश्वसन्यदिजंतुर्ननुलाभवानसौ ॥९०॥ अवगच्छतिमूढचेतनःप्रियनाशंहृदिशल्यमर्पितम् ॥
स्थिरधीस्तुतदेवमन्यतेकुशलद्वारतयासमुद्धृतम् ॥९१॥ स्वशरीरशरीरिणावपिश्रुतसंयोगविप

मनःसंयोगस्य विपर्ययो विभागो य
योगौ

ॐ र्य्ययौ यदा ॥ विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ॥ ८९ ॥ न पृथग्जनवच्छुचो वशं व
र. वं. शिनामुत्तम गन्तुमर्हसि ॥ द्रुमसानुमतां किमन्तरं यदि वायौ द्वितयेऽपि ते चलाः ॥ ९० ॥ स तथेति विनेतुरुदा
४३ रमतेः प्रतिगृह्य वचो विससर्ज मुनिम् ॥ तदलब्धपदं हृदि शोकघने प्रतियातमिवान्तिकमस्य गुरोः ॥ ९१ ॥
तेनाष्टौ परिगमिताः समाः कथंचिद्बालत्वादवितथसूनृतेन सूनोः ॥ सादृश्यप्रतिकृतिदर्शनैः प्रियायाः
स्वप्नेषु क्षणिकसमागमोत्सवैश्च ॥ ९२ ॥ तस्य प्रसह्य हृदयं किल शोकशङ्कुः प्लक्षप्ररोह इव सौ
धतलं बिभेद ॥ प्राणान्तहेतुमपि तं भिषजामसाध्यं लाभं प्रियानुगमने त्वरया स मेने ॥ ९३ ॥ सम्यग्विनीतम
थ वर्महरं कुमारमादिश्य रक्षणविधौ विधिवत्प्रजानाम् ॥ रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः प्रायोपवेश रघुः
नमतिर्नृपतिर्बभूव ॥ ९४ ॥ तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोर्देहत्यागादमरगणनालेख्यमा ४३

साद्यसद्यः ॥ पूर्वाकाराधिकतररुचा संगतः कान्तयासौ लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥ ९५ ॥ इति श्री
रघुवंशे महाकाव्ये कालिदासकृतौ अष्टमः सर्गः ॥ ८ ॥ पितुरनन्तरमुत्तरकोशलान्समधिगम्य समाधिजितेन्द्रियः ॥ दशरथः
प्रशशास महारथो यमवतामवतां च धुरि स्थितः ॥ १ ॥ अधिगतं विधिवद्यदपालयत्प्रकृतिमण्डलमात्मकुलो
चितम् ॥ अभवदस्य ततो गुणवत्तरं सनगरं नगरन्ध्रकरौजसः ॥ २ ॥ उभयमेव वदन्ति मनीषिणः समयवर्षित
या कृतकर्मणाम् ॥ बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधरान्वयम् ॥ ३ ॥ जनपदे न गदः पदमादधा
वभिभवः कुत एव सपत्नजः ॥ क्षितिरभूत्फलवत्यजनन्दने शमरतेऽमरतेजसि पार्थिवे ॥ ४ ॥ दशदिगन्तजिता
रघुणा यथा श्रियमपुष्यदजेन ततः परम् ॥ तमधिगम्य तथैव पुनर्बभौ न न महीनमहीनपराक्रमम् ॥ ५ ॥ समतया मंहीन
वसुवृष्टिविसर्जनैर्नियमनादसतां च नराधिपः ॥ अनुययौ यमपुण्यजनेश्वरौ सवरुणावरुणाग्रसरं रु

ॐ
र॰ वं॰
४५
अ॰ वाल्मीक्याविज
यीसर्गः

याः ६ नमगयाभिरतिर्न दुरोदरं न च शशिप्रतिमाभरणं मधु । मुदयाय न वा नवयौवना : प्रियतमा यतमानमपाहरन् ॥ ७ ॥ न कृपणोत्पभवत्यपि वासवे न वितथा परिहासकथास्वपि । न च सपत्नजने स्वपि तेन वागपरुषा परुषाक्षरमीरिता ॥ ८ ॥ उदयमस्तमयं च रघूद्वहादुभयमानशिरे वसुधाधिपाः । स हि निदेशमलंघयतामभूत्सुहृदयोहृदयः प्रतिगर्जताम् ॥ ९ ॥ अवनिमेकरथेन वरूथिना जितवतः किल तस्य धनुर्भृतः । विजयदुंदुभितां ययुरर्णवा घनरवा नरवाहनसंपदः ॥ १० ॥ अजयदेकरथेन स मेदिनीमुदधिनेमिमधिज्यशरासनः । जयमघोषयदस्य हि केवलं गजवती जवतीव्रहया चमूः ॥ ११ ॥ जघननिर्विषयीकृतमेखलानतनुचितांशुविलुप्तविशेषकान् । स रिपुदारगणाननकरोद्धलादनलकानलकाधिपविक्रमः ॥ १२ ॥ स्फुरितकोटिसहस्रमरीचिना समचिनोत्कुलिशेन हरिर्यशः । स धनुषा युधि सायकवर्षिणा स्वनवता नवताम

राम:
४५

रसाननः ॥१३॥ अमितपक्षबलः शतकोटिना शिखरिणां कुलिशेन पुरंदरः ॥ स शरवृष्टिमुचा धनुषा द्विषां
स्वनवता नवतामरसाननः ॥१४॥ चरणयोर्नखरागसमृद्धिभिर्मुकुटरत्नमरीचिभिरस्पृशन् ॥ नृपतयः शतशो
मरुतो यथा शतमखं तमखंडितपौरुषं ॥१५॥ निववृते स महार्णवरोधसः सचिवकारितबालसुतांजलीन् ॥
समनुकंप्य सपत्नपरिग्रहाननलकाननलकानवमां पुरीम् ॥१६॥ उपगतोपि च मंडलनाभितामनुदितान्यसि
रघु ५५ तातपवारणः ॥ श्रियमवेक्ष्य सरंध्रचलामभूदनलसोनलसोमसमद्युतिः ॥१७॥ तमपहाय ककुत्स्थकुलोद्भवं
पुरुषमात्मभवं च पतिव्रता ॥ नृपतिमन्यमसेवत देवता सकमला कमलाघवमर्थिषु ॥१८॥ तमलभंत पतिं प
तिदेवताः शिखरिणामिव सागरमापगाः ॥ मगधकोशलकेकयशासिनां दुहितरोहितरोपितमार्गणम् ॥१९॥
प्रियतमाभिरसौ तिसृभिर्बभौ तिसृभिरेव भुवं सह शक्तिभिः ॥ उपगतो विनिनीषुरिव प्रजा हरिहयोरिहयोगवि

वैरिहान्तकोपम

ईश्वरो भगवान्दशरथ: कृष्णाजिनं दीक्षयति ... मृगशृंगं दीक्षितं ... कृष्णविषाणे ... निष्कृते: ~

व तेगणां: ॥२०॥ क्रतुषु तेन विसर्जितमौलिना भुजसमाहृतदिग्वसुना कृता: ॥ कनकयूपसमुच्छ्रयशोभिनो वितम
अ सा सरयूतटा: ॥२१॥ अजिनदंडभृतं कुशमेखलां जितगिरं मृगशृंगपरिग्रहां ॥ अधिवसंस्तनुमध्वरदीक्षिता
र.वं. मसमभासमभासयदीश्वर: ॥२२॥ अवभृथप्रयतो नियतेंद्रिय: सुरसमाजसमाक्रमणोचित: ॥ नमयति स्म
४५ स केवलमुन्नतं वनमुचे नमुचेररये शिर: ॥२३॥ स किल संयुगमूर्ध्नि सहायतां मघवत: प्रतिपद्य महारथ: ॥
४५ स्वभुजवीर्यमगापयदुच्छ्रितं सुरवधूरवधूतभया: शरै: ॥२४॥ असकृदेकरथेन तरस्विना हरिहयाग्रसरेण ध-
नुर्भृता ॥ दिनकराभिमुखा रणरेणवो रुरुधिरे रुधिरेण सुरद्विषां ॥२५॥ अथ समाववृते कुसुमैर्नवैस्तमिव से- राम:
शेष उपयुयो भुजगेन्द्र ... मही ... वितुमेकनराधिपं ॥ यमकुबेरजलेश्वरवज्रिणां समधुरं मधुरंचितविक्रमं ॥२६॥ हिमविवर्णितचंदनप- ४५
ल्लवं विहरयन्मलयाद्रिमुदङ्मुख: ॥ विहगयो: कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयो: ॥२७॥ जिगा

दिनावसाने निश्चित वियोगयो:

मिषुर्धनदाध्युषितांदिशंरथयुजापरिवर्त्तितवाहनः ॥ दिनमुखानिरविर्हिमनिग्रहैर्विमलयन्मलयंनगमत्य
जत् ॥२८॥ कुसुमजन्मततोनवपल्लवास्तदनुषट्पदकोकिलकूजितम् ॥ इतियथाक्रममाविरभून्मधुर्द्रुमवतीर्य
वनस्थलीं ॥२९॥ व्रणगुरुप्रमदाधरदुःसहंजघननिर्विषयीकृतमेखलम् ॥ नखलुतावदशेषमपोहि
तुंरविरलंकृतवान्हिमम् ॥३०॥ परभृतामदनक्षतचेतसः प्रियसखीलघुवागिवयोषितां ॥ प्रियतमानकरोत्क
लहान्तरेमृदुरवाप्रसमागमान् ॥३१॥ अभिनयान्परिचेतुमिवोद्यतामलयमारुतकंपितपल्लवा ॥ अमदय
त्सहकारलतामनःसकलिकाकलिकामजितामपि ॥३२॥ नयगुणोपचितामिवभूपतेःसदुपकारफलांश्रि
यमर्थिनः ॥ अभिययुःसरसोमधुसंभृतांकमलिनीमलिनीरपतत्रिणः ॥३३॥ कुसुममेवनकेवलमार्त्तवंनवमशो
कतरोःस्मरदीपनम् ॥ किसलयप्रसवोपिविलासिनांमदयितादयिताश्रवणार्पितः ॥३४॥ विरचितामधुनो

गीं
र. वं.
४६

आलिंगनैः कुरवकस्तरुणः कराग्रैः शिञ्जानन्नूपुरपदाहननैरशोकः गंडूषसीधुपतनैर्बकुलोङ्कुरानामभ्येति माधवमये समये विकाशम् =

भ्रमरकर्तृकस्वरस्तुतिकारणोतायमु: भृंगाणमधुनिपीत्वा जग्मुः दानशौंडा नर्थिनःस्तुवन्तीतिभावः

पवनाश्रियामभिनवाङ्कुरपत्रविशेषकाः ॥ मधुलिहां मधुदानविशारदाः कुरवकारवकारणतां ययुः ॥३५॥ ८

शानचंद्रिकयाव्यवभासितं हसितमासवांछिमधोरिव ॥ तिलकपुष्पमसुव्यक्तषट्पदैः सुचिरसंचितरसंचित

मीकृभिः ॥३६॥ सुरभिसंगमजं वनमालया नवपलाशमधार्यत भंगुरं ॥ रमणदत्तमिवाद्रनखक्षतं प्रमदया मदया ७ =

पितलज्जया ॥३७॥ उपहितं शिशिरापगमश्रियां मुकुलजालमशोभत किंशुके ॥ प्रणयिनीव नखक्षतमंडनं प्रमदया मदया

पितलज्जया ॥३८॥ सुवदनावदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः ॥ मधुकरै

रकरोन्मधुलोलुपैर्बकुलमाकुलमायतपंक्तिभिः ॥३९॥ ललितविभ्रमबंधविचक्षणं सुरभिगंधपराजितकेस

रं ॥ पतिषु निर्विविशुर्मधुमंगनाः स्मरसखं रसखंडनवर्जितं ॥४०॥ प्रथममन्यभृताभिरुदीरिताः प्रविर

लाइव मुग्धवधूकथाः ॥ सुरभिगंधिषु शुश्रुविरे गिरः कुसुमितासु मिता वनराजिषु ॥४१॥ तिलकम् ॥

राम:
४६

ताकहर्म्यकृतास्पदैः कुसुममध्वनुषंगसुगंधिभिः ॥ कलमगीयत तं भ्रमराविभिर्नानास्मरस्तुतैरसुतैरवलास रवैः ॥४३॥ गा
मयितुं प्रभुरेव सुखेन मानमहं विवर्तं पाथवधूजनः ॥ इति दयात इवाभवदयता नरजनीं रजनीप्रभावतीमधो ॥४४॥ कृति
सुखभ्रमरस्वनगीतयः कुसुमकोमलदंतरुचो वभुः ॥ उपवनांतलताः पवनाहतैः किसलयैः सलयैरिव पाणिभिः
॥४४॥ मधुभिरेस्मितचारुतराननाः स्त्रिय इव श्लथसिंजितमेखलाः ॥ विकचतामरसा गृहदीर्घिका मदकलोदक
लोलविहंगमाः ॥४५॥ उपययौ तनुतां मधुखंडिता हिमकरोदयपांडुमुखच्छविः ॥ सहसितामिह समागमनेर्जि
वनितया नितया रजनीवधूः ॥४६॥ अपतुषारतया विशदप्रभैः सुरतरागपरिश्रमनोदिभिः ॥ कुसुमचापम
तेयदंशुभिर्हिमकरोर्जितकेतनम् ॥४७॥ कृतकृतार्थ नदीप्रवनश्रियः प्रतिनिधिः कनकाभरणस्य यत् ॥ युवत
यः कुसुमं दधुरांकितं तदलकेदलकेष्वपेशलम् ॥४८॥ अलिभिरंजनविंदुमनोहरैः कुसुमपंक्तिनिपातिभिरं

२ मकरो २

ॐ र० वं० ४७

कितः ॥ ४९ ॥ अमदयन्मधुगंधसनाथया ॥ न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलकं प्रमदामिव ॥ ४९ ॥

अमदयन्मधुगंधसनाथया किसलयाधरसंगतया मनः ॥ कुसुमसंभृतया नवमल्लिका स्मितरुचा तरुचारुविला

सिनी ॥ ५० ॥ अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवांकुरैः ॥ परभृताविरुतैश्च विलासिनः स्मरबलै

रबलैकरसाः कृताः ॥ ५१ ॥ उपचितावयवा शुचिभिः कणैरलिकदंबकयोगमुपेयुषी ॥ सदृशकांतिरलक्ष्यत मंज

रीतिलकजालकजालकमौक्तिकैः ॥ ५२ ॥ ध्वजपटं मदनस्य धनुर्भृतः छविकरं मुखचूर्णमृतुश्रियः ॥ कुसु

मकेसररेणुमलिव्रजाः सपवनोपवनोत्थितमन्वयुः ॥ ५३ ॥ अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकंठजिघृ

क्षया ॥ अनयदासनरज्जुपरिग्रहे भुजलतां जडतामबलाजनः ॥ ५४ ॥ त्यजत मानमलं बत विग्रहैर्न पुनरेति ग

तं चतुरं वयः ॥ परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ॥ ५५ ॥ अथ यथासुखमार्तवमुत्सवं स

रामः ४७

मयक्रोधरूवकरेणाचेदनं = प्रकृष्टलाघवादिगुणवंती = सर्वचिन्हेशुदोषयो गीम्यतलादचेलयामृगयाप्रवृत्ति र्नतुव्यसनेनेतिभावः =

मनुभूय विलासवतीसखः ॥ नरपतिश्चकमे मृगयारतिं स मधुमन्मधुमन्मथसंनिभः ॥४९॥ परिचयं चललक्ष्य
निपातने भयरुषोश्च तदिंगितबोधनं ॥ श्रमजयात्प्रगुणां च करोत्यसौ तनुमतोनुमतः सचिवैर्ययौ ॥५०॥
मृगवनोपगमक्षमवेषभृद्विपुलकंठनिषक्तशरासनः ॥ गगनमश्वखुरोद्धतरेणुभिर्नृसविता स वितानमिवाकरो
त् ॥५१॥ ग्रथितमौलिरसौ वनमालया नवपलाशसवर्णतनुच्छदः ॥ तुरगवल्गनचंचलकुंडलो विरुरुचे रुरुचेष्टि
तभूमिषु ॥५२॥ तनुलताविनिवेशितविग्रहा भ्रमरसंक्रमितेक्षणवृत्तयः ॥ ददृशुरध्वनि तं वनदेवताः सुनयनं नयनं
दितकोशलं ॥५३॥ श्वगणिवागुरिकैः प्रथमास्थितं व्यपगतानलदस्यु विवेश सः ॥ स्थिरतुरंगमभू
मिनिपानवन्मृगवयोगवयोपचितं वनं ॥५४॥ अथ नभस्य इव त्रिदशायुधं कनकपिंगतडिद्गुणसंयुतं ॥ ध
नुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ॥५५॥ तस्य स्तनप्रणयिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणी
गमनं पुरस्तात् ॥ आविर्बभूव कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृष्णसारं ॥५६॥ तत्प्रार्थितं जवनवा

मृगयूथं वनं प्रापामीसकार

ॐ जिगतेनरास्त्रात्तएणीमुखोद्धृतशरे एणीविभूतीणीपंक्ति ॥ श्यामीचकारवनमाकुलदृष्टिपातैर्वातेरितोत्पलदलप्रकरैरि
र.वं. वांभः ॥ ६४ ॥ लक्ष्मीकृतस्यहरिणस्यहरिप्रभावः प्रेक्ष्यस्थितांसहचरींव्यवधायदेहं ॥ आकर्णकृष्टमपिकामि
४८ तयासधन्वीबाणंकृपामृदुमनाःप्रतिसंजहार ॥ ६५ ॥ तस्यापरेष्वपिमृगेषुशरान्मुमुक्षोःकर्णान्तमेत्यबिभिदे
निबिडोऽपिमुष्टिः ॥ त्रासातिमात्रचटुलैःस्मरतःसुनेत्रैःप्रौढप्रियानयनविभ्रमचेष्टितानि ॥ ६६ ॥ उत्तस्थुषः
शिशिरपल्वलपंकमध्यान्मुस्ताप्ररोहकवलावयवानुकीर्णं ॥ जग्राहसद्रुतवराहकुलस्यमार्गंसुव्यक्तमार्द्रप
दपंक्तिभिरायताभिः ॥ ६७ ॥ तंवाहनादवनतोत्तरकायमीषद्विध्यन्तमुद्धतसटाःप्रतिहन्तुमीषुः ॥ नात्मानमस्यसह
सा विविदुर्वराहावृक्षेषुविद्धमिषुभिर्जघनाश्रयेषु ॥ ६८ ॥ तेनाभिघातरभसस्यविकृष्यपत्रीवन्यस्यनेत्रविवरेम
हिषस्यमुक्तः ॥ निर्भिद्यविग्रहमशोणितलिप्तपुंखस्तंपातयांप्रथममासपपातपश्चात् ॥ ६९ ॥ प्रायोविषा
णपरिमोक्षलघूत्तमांगान्खड्गांश्चकारनृपतिर्निशितैःक्षुरप्रैः ॥ शृंगंसदृप्तविनयाधिकृतःपरेषामत्युच्छ्रितंनम

रामः
४८

मध्येन तु दीर्घमायुः ॥७०॥ व्याघ्रानभीरभिमुखोत्पतितान्गुहाभ्यः फुल्लासनाग्रविटपानिव वायुभग्नान्
शिक्षाविशेषलघुहस्ततया निमेषात्तूणीचकार शरपूरितवक्त्ररन्ध्रान् ॥७१॥ निर्घातोग्रैः कुञ्जलीनाञ्जिघांसु-
र्ज्यानिर्घोषैः क्षोभयामास सिंहान् । नूनं तेषामभ्यसूयापरोऽभूद्वीर्योदग्रे राजशब्दे मृगाणाम् ॥७२॥ तान्हत्वा
गजकुलबद्धतीव्रवैरान् काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान् । आत्मानं रणकृतकर्मणां गजानामानृण्यं
गतमिव मार्गणैरमंस्त ॥७३॥ चमरान्परितः प्रवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी । नृपतीनिव तान्वि-
योज्य सद्यः सितवालव्यजनैर्जगाम शान्तिम् ॥७४॥ अपि तुरगसमीपादुत्पतन्तं मयूरं न स रुचिरकलापं बाणलक्ष्यी-
चकार । सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबन्धे केशपाशे प्रियायाः ॥७५॥ तस्य कर्कश-
विहारसंभवं स्वेदमाननविलग्नजालकम् । आचचाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः ॥७६॥

ॐ
र॰वं॰
४९

॥ इति विस्मृतान्यकरणीयमात्मनः सचिवावलंबितधुरंधराधिपं । परिवृद्धरागमनुबंधसेवया मृगया जहार
चतुरेव कामिनी ॥६७॥ स ललितकुसुमप्रवालशय्यां ज्वलितमहोषधिदीपिकासनाथाम् । नरपतिरतिवह
याबभूव क्वचिदसमेतपरिछदस्त्रियामाम् ॥६८॥ उषसि स गजयूथकर्णतालैः पटुपटहध्वनिभिर्विनीत
निद्रः ॥ अरमत मधुराणि तत्र शृण्वन्विहगविकूजितबंदिमंगलानि ॥६९॥ अथ जातु रुरोर्गृहीतवर्त्मा वि
पिने पार्श्वचरैरलक्ष्यमाणः ॥ श्रमफेनमुचा तपस्विगाढां तमसां प्राप नदीं तुरंगमेण ॥७०॥ कुंभपूरणभवः
पटुरुच्चैरुच्चचार निनदोंभसि तस्याः ॥ तत्र स द्विरदबृंहितशंकी शब्दपातिनमिषुं विससर्ज ॥७१॥ नृपतेः
प्रतिषिद्धमेवं य तत्कृतवान्पंक्तिरथो विलंघ्य यत् ॥ अपथे पदमर्पयंति हि श्रुतवंतोपि रजोनिमीलिताः ॥७२॥
हा तातेति क्रंदितमाकर्ण्य विषण्णस्तस्यान्विष्यन्वेतसगूढं प्रभवं सः ॥ शल्यप्रोतं वीक्ष्य सकुंभं मुनिपु

लक्ष्मीकामो मृगहाद
न्यत्रकरिवधं न कुर्या
दि [illegible] त्रिवचनं

वैतालीयवृत्तं
रामः
४९

वैश्यात्शूद्रकरलः
स्पष्टां

त्रं प्रादं तं घशल्यं ब्रह्मासी क्षितिपोऽपि ॥७५॥ तेनावतीर्य तुरगात्प्रथितान्वयेन पृष्टान्वयः स जलकुंभनिषण्णदे
हः ॥ तस्मै द्विजेतरतपस्विसुतः स्खलद्भिरात्मानमक्षरपदैः कथयांबभूव ॥७६॥ तच्चोदितः स तमनुद्धृत
शल्यमेव पित्रोः सकाशमवसन्नदृशोर्निनाय ॥ ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं
नृपतिः शशंस ॥७७॥ तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहारयतामुरस्तः ॥ सोऽभूत्प
रासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥७८॥ दिष्टांतमाप्स्यति भवानपि पुत्रशो
कादंते वयस्यहमिवेति तमुक्तवंतं ॥ आक्रांतपूर्वमिव मुक्तविषं भुजंगं प्रोवाच कोशलपतिः प्रथमापराद्धः ॥७९॥
शापोऽप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता मयि पातितोऽयम् ॥ कृष्यां दहन्नपि खलु क्षि
तिमिंधनेद्धो बीजप्ररोहजननीं ज्वलनः करोति ॥८०॥ इत्थंगते गतघृणः किमयं विधत्तां वध्यस्त

कूटस्थिका:

दशरथः

रो
र.वं.
५०
50

वैतस्त्यंमिहितो वसुधाधिपेन ॥ लब्धानृ हुताशनवतः समुनिर्ययावैपुत्रंपरासुमनुगंतुमनाः सदारः ॥८१॥
प्राप्तानुगः सपदि शासनमस्य राजा संपाद्य पातकविलुप्तधृतिर्निवृत्तः ॥ अंतर्निविष्टपदमात्मविनाश
हेतुं शापं दधज्ज्वलनमौर्वमिवांबुराशिः ॥८२॥ इति श्री रघुवंशे महाकाव्ये कालिदासकृतौ म्रगयावर्ण
नो नाम नवमः सर्गः ॥९॥ पृथिवीं शासतस्तस्य पाकशासनतेजसः ॥ किंचिदूनमनूनर्द्धेः शरदामयुतं य
ययौ ॥१॥ न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनम् ॥ सुताभिधानं स ज्योतिः सद्यः शोकतमोपहम् ॥२॥
अतिष्ठत्प्रत्ययापेक्षसंततिः स चिरं नृपः ॥ प्राङ्मंथादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ॥३॥ मनोर्वंशस्थि
रं तस्मिन्ननभिव्यक्तसंततिः ॥ निमज्ज्य पुनरुत्थास्यन्नदः शोणाद्विवाभवत् ॥४॥ ऋष्यशृंगादयस्तस्य संतः
संतानकांक्षिणः ॥ आरेभिरे यतात्मानः पुत्रीयामिष्टिमृत्विजः ॥५॥ तस्मिन्नवसरे देवाः पौलस्त्योप

अतः यो भी नशाप
प्रत्तान विश्राम हेतु
प्रियम रः

ऋ = रामः
५०

योगनिद्रायाः

प्रयुक्ताः हरिं ॥ तमभिजग्मुर्निदाघार्ताः छायावृक्षमिवाध्वगाः ॥ ६ ॥ ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः

गमनसाधनाः

अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् ॥ ७ ॥ भोगिभोगासनासीनं ददृशुस्तं दिवौकसः ॥

तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम् ॥ ८ ॥ श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ॥ अङ्के

निक्षिप्तचरणमास्तीर्णकरपल्लवे ॥ ९ ॥ प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकं ॥ दिवसं शार

दमिव प्रारंभसुखदर्शनम् ॥ १० ॥ प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणम् ॥ कौस्तुभाख्यम

पां सारं बिभ्राणं बृहतोरसा ॥ ११ ॥ बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः ॥ आविर्भूतमपां मध्ये

पारिजातमिवापरम् ॥ १२ ॥ दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः ॥ हेतिभिश्चेतनावद्भि

रुदीरितजयस्वनम् ॥ १३ ॥ मुक्तशेषविरोधेन कुलिशव्रणलक्ष्मणा ॥ उपस्थितं प्राञ्जलिना

प्रभानुरंजितः श्रीवत्सो येन

ललित

आयुधैः

मुक्तः शेषनागेन सह विरोधो येन तेन

विशेषणद्वये नवरता
योः सौकुमार्यात् किंचि
देलास्पर्शमसहत्वं सूचते
प्रारंभः प्रकृष्टोपो गोयेप्राते
प्रांयोगिनां सत्व नन्दप्रा नम्
सुखसुखप्राप्रां मे सुदेदर्शनदः

ॐ

र॰ वं॰

५१

51

विनीतेनरात्मता ॥१४॥ योगनिद्रान्तविशदैः पावनैरवलोकनैः । भृग्वादीननुगृह्णन्तं सौखशायनि
कानृषीन् ॥१५॥ प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् । अथैनं तुष्टुवुः स्तुत्यमवाङ्मनस
गोचरम् ॥१६॥ नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते । अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥१७॥
एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ॥ नानात्वं रागसंयोगात्स्फटिकस्येव ते स्मृतम् ॥१८॥ रसां
तराण्येकरसं यथा दिव्यं पयोऽश्नुते ॥ देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ॥ अमेयो
मितलोकस्त्वमनर्थी प्रार्थनावहः ॥ अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणम् ॥२०॥ हृदयस्थ
मनासन्नमकामं त्वां तपस्विनम् । दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥२१॥ सर्वज्ञस्त्वमविज्ञा
तः सर्वयोनिस्त्वमात्मभूः ॥ सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ॥२२॥ सप्तसामोपगीतं त्वां स

रामः

५१

निर्द्वन्द्वं ... पर्योः

रथंतरादिभिः

वेदज्ञाः ख्युः धर्मार्थकाममोक्षाणां फलं ज्ञानं चत्वारो युगा यस्मात् कालावस्था

प्तार्णवजलेशयं ॥ सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयम् ॥ २३ ॥ चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ॥
चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥ २४ ॥ अभ्यासनिगृहीतेन मनसा हृदयाश्रयं ॥ ज्योतिर्मयं विचिन्वंति
योगिनस्त्वां विमुक्तये ॥ २५ ॥ अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ॥ स्वपतो जागरूकस्य याथात्म्यं वे
द कस्तव ॥ २६ ॥ शब्दादीन् विषयान् भोक्तुं चरितुं दुश्चरं तपः ॥ पर्याप्तोसि प्रजाः पातुमौदासीन्येन वर्ति
तुं ॥ २७ ॥ बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः ॥ त्वय्येव निपतंत्योघा जाह्नवीया इवार्णवे ॥ २८ ॥
त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां ॥ गतिस्त्वं वीतरागाणामभूयः संनिवृत्तये ॥ २९ ॥ प्रत्यक्षो
प्यपरिच्छेद्यो मह्यादिर्महिमस्तव ॥ आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ॥ ३० ॥ केवलं स्मरणे
नैव पुनासि पुरुषं यतः ॥ अनेन वृत्तयः शेषाः निवेदितफलास्त्वयि ॥ ३१ ॥ उदधेरिव रत्नानि तेजांसि

जें र०वं० ५२

विवस्वतः॥ स्तुतिभ्यो व्यतिरिच्यंते दूराणि चरितानि ते॥ ३२॥ अनवाप्तमवाप्तव्यं न ते किंचन विद्यते। लोकानुग्रह एवैको
हेतुस्ते जन्मकर्मणोः॥ ३३॥ महिमानं यदुत्कीर्त्य तव संह्रियते वचः। श्रमेण तदशक्त्या वा न गुणानामियत्तया॥ ३४॥
इति प्रसादयामासुस्ते सुरास्तमधोक्षजं॥ भूतार्थव्याहृतिः सा हि न स्तुतिः परमेष्ठिनः॥ ३५॥ तस्मै कुशलसंप्रश्नव्यं-
जितप्रीतये सुराः॥ भयमप्रलयोद्वेलादाचख्युर्नैरृतोदधेः॥ ३६॥ अथ वेलासमासन्नशैलरंध्रानुनादिना॥ स्व-
रेणोवाच भगवान्परिभूतार्णवध्वनिः॥ ३७॥ पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता॥ बभूव कृतसंस्कारा चरिता-
र्थैव भारती॥ ३८॥ बभौ सदनज्योत्स्ना सा विभोर्वदनोद्गता॥ निर्यातशेषा चरणाद्गंगेवोर्ध्वप्रवर्तिनी॥ ३९॥ जाने वो रक्षसा-
क्रांतावनुभावपराक्रमौ॥ अंगिनां तमसेवोभौ गुणौ प्रथममध्यमौ॥ ४०॥ विदितं तप्यमानं च तेन मे भुवनत्र-
यम्॥ अकामोपनतेनेव साधो हृदयमेनसा॥ ४१॥ कार्येषु चैककार्यत्वादभ्यर्थ्योऽस्मि न वज्रिणा॥ स्वयमे-

राम: ५२

वह्निर्वातोऽग्नेः सारथ्यं प्रतिपद्यते ॥४२॥ स्वासिधारापरिहृतः कामं चक्रस्य तेन मे ॥ स्थापितो दशमो मूर्द्धा
लभ्यांश इव रक्षसा ॥४३॥ स्रष्टुर्वरातिसर्गात्तु मया तस्य दुरात्मनः ॥ अत्यारूढं रिपोः सोढं चन्दनेनेव भोगिनः ॥४४॥
धातारं तपसा प्रीतं ययाचे स हि राक्षसः ॥ दैवात्सर्गादवध्यत्वं मर्त्येष्वास्थापराङ्मुखः ॥४५॥ सोऽहं दाशरथिर्भूत्वा रण
भूमेर्बलिक्षमं ॥ करिष्यामि शरैस्तीक्ष्णैस्तच्छिरः कमलोपमम् ॥४६॥ अचिराद्यज्वभिर्भागं कल्पितं विधिवत्पु
नः ॥ मायाविभिरनालीढमादास्यध्वे निशाचरैः ॥४७॥ वैमानिकाः पुण्यकृतस्त्यजन्तु मरुतां पथि ॥ पुष्पकालो
कसंक्षोभं मेघावरणतत्पराः ॥४८॥ मोक्ष्यध्वे स्वर्गबन्दीनां वेणीबन्धानदूषितान् ॥ शापयन्त्रितपौलस्त्यबलात्का
रकचग्रहैः ॥४९॥ रावणावग्रहक्लान्तमिति वागमृतेन सः ॥ अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥५०॥ पुरु
हूतप्रभृतयः सुरकार्योद्यताः सुराः ॥ अंशैरनुययुर्विष्णुं पुष्पैर्वायुमिव द्रुमाः ॥५१॥ अथ तस्य विशांपत्युरन्ते काम्य
र्मणः

स्यकर्मणोः ॥ पुरुषः प्रबभूवाग्नेर्विस्मयेन सहर्त्विजां ॥ यम हेमपात्रीकृतं दोर्भ्यामादधानः पयश्चरुं ॥ अनुप्रवे
शादाद्यस्य पुंसस्तेनापि दुर्वहम् ॥५३॥ युग्मम् ॥ प्रजापत्योपनीतं तदन्नं प्रत्यग्रहीन्नृपः ॥ वृषेव पयसां सार
माविष्कृतमुदन्वता ॥५४॥ अनेन कथिता राज्ञो गुणास्तस्यान्यदुर्लभाः ॥ प्रसूतिं चकमे तस्मिंस्त्रैलोक्यप्रभवो
पियत् ॥५५॥ स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितं ॥ द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥५६॥
अर्चिता तस्य कौशल्या प्रिया केकयवंशजा ॥ अतः संभाविता ताभ्यां सुमित्रामैच्छदीश्वरः ॥५७॥ ते बहुज्ञस्य
चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ॥ चरोरर्धार्धभागाभ्यां तामयोजयतामुभे ॥५८॥ सा हि प्रणयवत्यासीत्स
पत्न्योरुभयोरपि ॥ भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः ॥५९॥ ताभिर्गर्भः प्रजाभूत्यै दध्रे देवांशसंभवः ॥ ५
सौरीभिरिव नाडीभिरमृताख्याभिरम्मयः ॥ ६० ॥ सममापन्नसत्वास्ता रेजुरापाण्डुरत्विषः ॥ अन्तर्गतफलारंभाः

५३

सस्यानामिव संपदः ॥ ६१ ॥ गुप्तं ददृशुरात्मानं सर्वाः स्वप्नेषु वामनैः ॥ जलजासिगदाशार्ङ्गचक्रलांछितमूर्त्तिभिः ॥ ६२ ॥
हेमपत्रप्रभाजालं गगने च वितन्वता ॥ उह्यंते स्म सुपर्णेन वेगाकृष्टपयोमुचा ॥ ६३ ॥ विभ्रत्या कौस्तुभन्यासं स्तनांतर
विलंबिनं ॥ पर्युपास्यंत लक्ष्म्या च पद्मव्यजनहस्तया ॥ ६४ ॥ कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः ॥ ब्र
ह्मर्षिभिः परं ब्रह्म गृणद्भिरुपतस्थिरे ॥ ६५ ॥ कुलकम ॥ ताभ्यस्तथाविधान्स्वप्नान् श्रुत्वा प्रीतो हि पार्थिवः
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥ ६६ ॥ विभक्तात्मा विभुस्तासामेकः कुक्षिष्वनेकधा ॥ उवास प्रतिमाचंद्रः
प्रसन्नानामपामिव ॥ ६७ ॥ अथाग्र्यमहिषी राज्ञः प्रसूतिसमये सती ॥ पुत्रं तमोपहं लेभे नक्तं ज्योतिरिवौषधिः ॥ ६८
राम इत्यभिरामेण वपुषा तस्य चोदितः ॥ नामधेयं गुरुश्चक्रे जगत्प्रथममंगलं ॥ ६९ ॥ रघुवंशप्रदीपेन तेना
प्रतिमतेजसा ॥ रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन् ॥ ७० ॥ शय्यागतेन रामेण माता शातोदरी बभौ

ॐ सैकतांभोजबलिना जाह्नवीव शरत्कृशा ॥ ७१ ॥ कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् । जनयित्रीमलंचक्रे
यः प्रश्रय इव श्रियम् ॥ ७२ ॥ सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ । सम्यगागमिता विद्या प्रबोधविनयाविव ॥ ७३ ॥
र० वं० निर्दोषमभवत्सर्वमाविष्कृतगुणं जगत् । अन्वगादिव हि स्वर्गो गां गतं पुरुषोत्तमम् ॥ ७४ ॥ कृशानुरपधूमत्वात्प्र
५४ सन्नत्वात्प्रभाकरः । रक्षोविप्रकृतावास्तामपविद्धशुचाविव ॥ ७५ ॥ तस्योदये चतुर्मूर्तेः पौलस्त्यचकितेश्वराः ।
56 विरजस्कैर्नभस्वद्भिर्दिश उच्छ्वसिता इव ॥ ७६ ॥ दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः । मणिव्याजेन पर्य
स्ताः पृथिव्यामश्रुबिंदवः ॥ ७७ ॥ पुत्रजन्मप्रवेश्यानां तूर्याणां तस्य पुत्रिणः । आरंभं प्रथमं चक्रुर्देवदुंदुभयो
दिवि ॥ ७८ ॥ संतानकमयी वृष्टिर्भवने तस्य पेतुषी । सन्मंगलोपचाराणां सैवादिरचनाभवत् ॥ ७९ ॥ कु रामः
माराः कृतसंस्कारास्ते धात्रीस्तन्यपायिनः । आनंदेनाग्रजेनेव समं ववृधिरे पितुः ॥ ८० ॥ स्वाभाविकं विनीत ५४

त्वं तेषां विनयकर्मणा ।। मूर्छन्सहजं तेजो हविषेव हविर्भुजां ।। ८१ ।। परस्पराविरुद्धास्ते तद्रघोरनघं कुलमू ।। अ
लमुद्द्योतयामासुर्देवारण्यमिवर्तव: ।। ८२ ।। समानेऽपि हि सौभ्रात्रे यथोभौ रामलक्ष्मणौ ।। तथा भरतशत्रुघ्नौ
प्रीत्या द्वंद्वं बभूव तु: ।। ८३ ।। तेषां द्वयोर्द्वयोरैक्यं बिभिदे न कदाचन ।। यथा वायुविभावस्वोर्यथा चंद्रसमुद्रयो: ८४
प्रजाना तैः प्रजानां प्रभुस्तेजसा प्रश्रयेण च ।। मनो जह्रुर्निदाघान्ते श्यामाभ्रा दिवसा इव ।। ८५ ।। स चतुर्धा बभौ व्यस्त: प्र
सव: पृथिवीपते: ।। धर्मार्थकाममोक्षाणामवतार इवांगवान् ।। ८६ ।। गुणैराराधयामासुस्ते गुरुं गु
रुवत्सला: ।। तमेव चतुरंतेशं रत्नैरिव महार्णवा: ।। ८७ ।। सुरगज इव दंतैर्भग्नदैत्यासिधारैर्नय इव पणबंध
व्यक्तयोगैरुपायै: ।। हरिरिव युगदीर्घैर्दोर्भिरंशैस्तदीयै: पतिरवनिपतीनां तैश्चकासे चतुर्भि: ।। ८८ ।।
इति श्री रघुवंशे महाकाव्ये कालिदासकृतौ रामावतारो नाम दशमो सर्ग: ।। १० ।। कौष्ठकेन सकिलालिखिती

श्रीः ध्वरो राममध्वरविघातशान्तये ॥ काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥ १ ॥ कृच्छ्रलब्धम
रा. वं. पि मेदिनीपतिर्लब्धवर्णभाक्तं दिदेश मुनये सलक्ष्मणम् ॥ अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थि
५५ ता ॥ २ ॥ यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसत्क्रियाम् ॥ तावदाशु विहिता मरुत्सखैः सा स वं:
पुष्पजलवर्षिभिर्घनैः ॥ ३ ॥ तौ निदेशकरणोद्यतौ पितुर्धन्विनौ चरणयोर्निपेततुः ॥ भूपतेरपि तयोः
प्रवत्स्यतोर्नम्रयोरुपरि बाष्पबिन्दवः ॥ ४ ॥ लक्ष्मणानुचरमेव राघवं नेतुमैच्छदृषिरित्यसौ नृपः ॥ आ राम:
शिषं प्रयुयुजे न वाहिनीं सा हि रक्षणविधौ तयोः क्षमा ॥ ५ ॥ तौ पितुर्नयनजेन वारिणा किंचिदुक्षितशि ५५ ।
खण्डकावुभौ ॥ धन्विनौ तमृषिमन्वगच्छतां पौरदृष्टिकृतमार्गतोरणौ ॥ ६ ॥ मातृवर्गचरणस्पृशौ मुने
स्तौ प्रपद्य पदवीं महौजसः ॥ रेजतुर्गतिवशात्प्रवर्तिनौ भास्करस्य मधुमाधवाविव ॥ ७ ॥ वीचिलो

उत्कोऽसुक्रन्नकुलमेदनमपायास्त्व
समयोद्यन्त्रचापलमपिशोभनाभि

रभुजयोस्तयोर्गतंशैशवोचितमवाच्यमप्यशोभत ॥ तोयदागमइवोद्ध्यभिद्ययोर्नामधेयसदृशंविचेष्टितं ८
तौबलातिबलयोःप्रभावतोविद्ययोःपथिमुनिप्रदिष्टयोः ॥ मम्लतुर्नमणिकुट्टिमोचितौमातृपार्श्वपरिवर्ति
नाविव ॥ ९ ॥ पूर्ववृत्तकथितैःपुराविदःसानुजःपितृसखस्यराघवः ॥ उह्यमानइववाहनोचितःपादचारमपिन
व्यभावयत् ॥ १० ॥ तौसरांसिरसवद्भिरंबुभिःकूजितैःश्रुतिसुखैःपतत्रिणः ॥ वायवःसुरभिपुष्परेणुभिःछाय
यावजलदाःसिषेविरे ॥ ११ ॥ नांभसांकमलशोभिनांतथाशाखिनांनचपरिश्रमच्छिदां ॥ दर्शनेनलघुनाय
थातयोःप्रीतिमापुरुभयोस्तपस्विनः ॥ १२ ॥ स्थाणुदग्धवपुषस्तपोवनंप्राप्यदाशरथिरात्तकार्मुकः ॥ वि
ग्रहेणमदनस्यचारुणासोभवत्प्रतिनिधिर्नकर्मणा ॥ १३ ॥ तौसुकेतुसुतयाखिलीकृतेकौशिकाद्विदितशा
पयापथि ॥ निन्यतुःस्थलनिवेशिताटनीलीलयैवधनुषीअधिज्यताम् ॥ १४ ॥ ज्यानिनादमथगृह्

स्थाणुः कीलेहरे
स्थिरपतिविस्रवः
विग्रहः समकाये

निष्ठिहेनले
लघुरिममर्थः

कोटिःस्यात्पीलवदः

ज्यामौर्वीमात्रम्
सिञ्चितिविश्वम्

ॐ र॰वं॰ ५६ 56

तीतयोः प्रादुरासबहुलक्षपाछविः ॥ ताडकाचलकपालकुंडलाकालिकेवनिबिडाबलाकिनी ॥१५॥ तीव्रवेगधुत
मार्गवृक्षयाप्रेतचीवरवसोग्रगंधया ॥ अभ्यभाविभरताग्रजस्तयावात्ययेवपितृकाननोत्थया ॥१६॥ उद्यतैकभु
यष्टिमायतींश्रोणिलंबिपुरुषांत्रमेखलाम् ॥ तांविलोक्यवनितावधेघृणांपत्रिणासहमुमोचराघवः ॥१७॥
यच्चकारविवरंशिलाघनेताडकोरसिसरामसायकः ॥ अप्रविष्टविषयस्यरक्षसांद्वारतामगमदंतक
स्यतत् ॥१८॥ बाणभिन्नहृदयानिपेतुषीसास्वकाननभुवंनकेवलं ॥ विष्टपत्रयपराजयस्थिरांरावणश्रि
यमपिव्यकंपयत् ॥१९॥ राममन्मथशरेणताडितादुःसहेनहृदयेनिशाचरी ॥ गंधवद्रुधिरचंदनोक्षि
ताजीवितेशवसतिंजगामसा ॥२०॥ नैर्ऋतघ्नमथमंत्रवन्मुनेःप्रापदस्त्रमवदानतोषितात् ॥ ज्योतिरिंधननि
पातिभास्करात्सूर्यकांतइवताडकांतकः ॥२१॥ वामनाश्रमपदंततःपरंपावनंश्रुतमृषेरुपेयिवा

रामः ५६

न॥ उन्मनाः प्रथमजन्मचेष्टितान्यस्मरन्नपि बभूव राघवः॥२२॥ आससाद मुनिरात्मनस्ततः शिष्यवर्गपरिक
ल्पितार्हणं॥ बद्धपल्लवपुटांजलिद्रुमं दर्शनोन्मुखमृगं तपोवनं॥२३॥ तत्र दीक्षितमृषिं ररक्षतुर्विघ्नतो द
शरथात्मजौ शरैः॥ लोकमंधतमसात्क्रमोदितौ रश्मिभिः शशिदिवाकराविव॥२४॥ वीक्ष्य वेदिमथ रक्तबिं
दुभिर्बंधुजीवपृथुभिः प्रदूषितां॥ संभ्रमोभवदपोढकर्मणामृत्विजां च्युतविकंकतस्रुचां॥२५॥ उन्मुखः स
पदि लक्ष्मणाग्रजो बाणमाश्रयमुखात्समुद्धरन्॥ रक्षसां बलमपश्यदंबरे गृध्रपक्षपवनेरितध्वजं॥२६॥ तत्र या
वधिपती मखद्विषां तौ शरव्यमकरोत्स नेतरान्॥ किं महोरगविसर्पिविक्रमो राजिलेषु गरुडः प्रवर्तते॥२७॥
सोस्त्रमुग्रजवमस्त्रकोविदः संदधे धनुषि वायुदैवतं॥ तेन शैलगुरुमप्यपातयत्पांडुपत्रमिव ताडकासुतं॥२८॥
यः सुबाहुरिति राक्षसोपरस्तत्र तत्र विससर्प मायया॥ तं क्षुरप्रशकलीकृतं कृती पत्रिणां व्यभजदाश्रमा

ॐ दीप्तिः ॥२९॥ इत्थमाप्तमखविघ्नयोस्तयोः संयुगीनमभिनंद्य विक्रमम् ॥ ऋत्विजः कुलपतेर्यथाक्रमं वा-
र० वं० ग्यतस्य निरवर्तयन्क्रियाः ॥३०॥ तौ प्रणामचलकाकपक्षकौ भ्रातरावबभृथाप्लुतो मुनिः ॥ आशिषामनुपदं सम-
५७ स्पृशद्दर्भपाटिततलेन पाणिना ॥३१॥ तं न्यमंत्रयत संभृतक्रतुर्मैथिलः स मिथिलां व्रजन्वशी ॥ राघवावपि नि-
नाय विभ्रतौ तद्धनुःश्रवणजं कुतूहलम् ॥३२॥ तैः शिवेषु वसतिर्गताध्वभिः सायमाश्रमतरुष्वगृह्यत ॥
येषु दीर्घतपसः परिग्रहो वासवक्षणकलत्रतां ययौ ॥३३॥ प्रत्यपद्यत चिराय यत्पुनश्चारु गौतमवधूः शिलाम-
यी ॥ स्वं वपुः सकलकल्मषच्छिदां रामपादरजसामनुग्रहः ३४ राघवान्वितमुपस्थितं मुनिं तं निशाम्य जन-
को जनेश्वरः ॥ अर्थकामसहितं सपर्यया देहबद्धमिव धर्ममभ्यगात् ॥३५॥ तौ विदेहनगरीनिवासिनां गां गतौ- रामः
विव दिवः पुनर्वसू ॥ मन्यते स्म पिबतां विलोचनैः पक्ष्मपातमपि वंचनां मनः ॥३६॥ यूपवत्यवसिते क्रिया- ५७

समाप्ते

विधौ कालवित्कुशिकवंशवर्द्धनः ॥ राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयांबभूव सः ॥ ३७ ॥ तस्य वीक्ष्य ल-
लितं वपुः शिशोः पार्थिवः प्रथितवंशवर्द्धनः ॥ स्वं विचिंत्य च धनुर्दुरानमं पीडितो दुहितृशुल्कसंस्थया ॥ ३८ ॥ अ-
ब्रवीच्च भगवन्मतंगजैर्यद्बृहद्भिरपि कर्म दुष्करं ॥ तत्र नाहमनुमंतुमुत्सहे मोघवृत्ति कलभस्य साहसम् ॥ ३९ ॥ ह्री-
ह्रेपिता हि बहवो नरेश्वरास्तेन तात धनुषा धनुर्भृतः ॥ ज्यानिघातकठिनत्वचो भुजान्स्वान्विधूय धिगिति प्र-
तस्थिरे ॥ ४० ॥ प्रत्युवाच तमृषिर्निशाम्यतां सारतोयमथवा हि तं गिरा ॥ चाप एव भवतो भविष्यति व्यक्तशक्ति-
रशनिर्गिराविव ॥ ४१ ॥ एवमाप्तवचनात्स पौरुषं काकपक्षकधरेपि राघवे ॥ श्रद्दधे त्रिदशगोपमात्रके दाहश-
क्तिमिव कृष्णवर्त्मनि ॥ ४२ ॥ व्यादिदेश गणशोथ पार्श्वगान्कार्मुकाभिहरणाय मैथिलः ॥ तैजसस्य धनुषः
प्रवृत्तये तोयदानिव सहस्रलोचनः ॥ ४३ ॥ ज्यानतयाप्यजनकस्य पार्श्वगाः प्रेमसस्परिफुल्लचक्षुषः ॥ त्र्यंनयं

ॐ तिमृदितास्मितेधनुर्दर्शिहंवकुलसारवत्तया ॥४४॥ नन्वसत्तमृगोङ्गभीषणं शैलशारथिमाददेधनुः ॥ वि
१०.वं. दुतक्रतुमृगानुसारिणं येनवाणमसृजद्वृषध्वजः ॥४५॥ आततज्यमकरोत्ससंसदाविस्मयस्तिमितनेत्र
५८ मीक्षितः ॥ शैलसारमपिनातियत्नतः पुष्पचापमिवपेशलं स्मरः ॥४६॥ भज्यमानमतिमात्रकर्ष
तत्स्वनेनगगन स्पृशा = णात्तेनवज्रपरुषस्वनं धनुः ॥ भार्गवाय दृढमन्यवेपुनः क्षत्रमुद्यतमितिन्यवेदयत् ॥४७॥ मैथिलः
५८ सपदिसत्यसंगरोराघवायतनयामयोनिजां ॥ संनिधौद्युतिमतोनिधेरग्निसाक्षिकमिवातिसृष्टवान् ॥४८॥ स्वांददौ प्रियपति वामदर्श्वतिः =
दृष्टसारमथरुद्रकार्मुके वीर्यशुल्कमभिनंद्यमैथिलः ॥ राघवायतनयामयोनिजां पार्थिवीं श्रियमिवो
र्जितामदात् ॥४९॥ प्राहिणोच्चमहितंमहाद्युतिः कोशलाधिपतयेपुरोधसं ॥ भृत्यभाविदुहितुः राम
परिग्रहाद्दिश्यतांकुलमिदंनिमेरिति ॥५०॥ अन्वियेषसदृशीं सवस्नुषांप्रापयेनमनुकूलवा ५८

जनकप्रेषितः

द्विजः ॥ सयएववसुधातलंविपद्यते कल्पवृक्षफलधर्मिकांक्षितम् ॥५१॥ उत्सुकश्चसुतदारकर्मणासो

भवकार्मुकरूपमातस्थितम् ॥ गौतमस्यतनयोनुकूलवाक्प्रार्थितंहिसुकृतांमकाम्रतामकृत ॥५२॥ तस्यकल्पि

तपुरस्क्रियाविधेः शुश्रुवान्वचनमग्रजन्मनः ॥ उच्चचालबलभित्सखोवशीसैन्यरेणुमुषितार्कदीधि

तिः ॥५३॥ आससादमिथिलांसवेष्टयन्पीडितोपवनपादपैर्बलैः ॥ प्रीतिरोधमसहिष्टसापुरीस्त्री

वकान्तपरिभोगमायतम् ॥५४॥ तौसमेत्यसमयस्थितावुभौभूपतीवरुणवासवोपमौ ॥ कन्यकात

नयकौतुकक्रियांस्वप्रभावसदृशींवितेनतुः ॥५५॥ पार्थिवीमुदवहद्रघूद्वहोलक्ष्मणस्तदनुजामथो

योयमावधिगतौ सुमित्रया

र्मिलाम् ॥ यौतयोरवरजौवरौजसौतौकुशध्वजसुतेसुमध्यमे ॥५६॥ तानराधिपसुतानृपात्मजैस्ते

चताभिरगमन्कृतार्थताम् ॥ सोभवद्वरवधूसमागमः प्रत्ययप्रकृतियोगसन्निभः ॥५७॥ तेचतुर्थ

र० वं०
५८

सहितास्त्रयो बभुः सूनवो नववधूपरिग्रहाः ॥ सामदानविधिभेदविग्रहाः सिद्धिमन्त इव तस्य भूपतेः ॥ ५७ ॥
एवमात्तरतिरात्मसंभवांस्तान्निवेश्य चतुरोऽपि तत्र सः ॥ अथ सत्रिषु विसृज्य मैथिलः स्वां पुरीं दशरथो न्यव
र्तत ॥ ५८ ॥ तस्य जातु मरुतः प्रतीपगा वर्त्मनि ध्वजतरुप्रमाथिनः ॥ चिक्लिशुर्भृशतया वरूथिनीमु
त्तटा इव नदीरयाः स्थलीम् ॥ ६ ॥ लक्ष्यते स्म तदनंतरं रविर्बद्धभीमपरिवेषमंडलः ॥ वैनतेयशमित
स्य भोगिनो भोगवेष्टित इव च्युतो मणिः ॥ ६१ ॥ श्येनपक्षपरिधूसरालकाः सांध्यमेघरुधिरार्द्रवास
सः ॥ अङ्गना इव रजस्वला दिशो नो बभूवुरवलोकनक्षमाः ॥ ६२ ॥ भास्करश्च दिशमध्युवास यां तां श्रि
ताः प्रतिभयं ववाशिरे ॥ क्षत्रशोणितपितृक्रियोचितं चोदयंत्य इव भार्गवं शिवाः ॥ ६३ ॥ तत्प्रतीपपवना
दिवैकृतं प्रेक्ष्य शान्तिमधिकृत्य कृत्यवित् ॥ अन्वयुङ्क्त गुरुमीश्वरः क्षितेः स्वंतमित्यलघयत्स तद्व्य
थां ॥ ६४ ॥ तेजसः सपदि राशिरुत्थितः प्रादुरास किल वाहिनीमुखे ॥ यः प्रमृज्य नयनानि सैनिकैर्ल

भार्गवोऽयं दशरथोऽमंस्त । स्तुतिः ॥

लक्षणीयपुरुषाकृतिश्चिरात् ॥ ६४ ॥ पित्र्यमंशमुपवीतलक्षणं मातृकं च धनुरूर्जितं दधत् ॥ यः
ससोम इव घर्मदीधितिः सद्विजिह्व इव चंदनद्रुमः ॥ ६६ ॥ येन रोषपरुषात्मनः पितुः शासने
स्थितभिदोऽपि तस्थुषा ॥ वेपमानजननीशिरश्छिदा प्रागजीयत घृणा ततो मही ॥ ६७ ॥ अक्षबी
जवलयेन निर्बभौ दक्षिणश्रवणसंस्थितेन यः ॥ क्षत्रियान्तकरणैकविंशतेर्व्याजपू
र्वगणनामिवोद्वहन् ॥ ६८ ॥ तं पितुर्वधभवेन मन्युना राजवंशनिधनाय दीक्षितं ॥ बालसूनुर
वलोक्य भार्गवं स्वां दशां च विषसाद पार्थिवः ॥ ६९ ॥ राम नाम इति तुल्यमात्मजे वर्तमा
नमहिते च दारुणे ॥ हृद्यमस्य भयदायि चाभवद्रत्नजातमिव हारसर्पयोः ॥ ७० ॥ अर्घ्यमर्घ्य

विषयोऽयं दशरथो दशरथान्वितः ॥

मितिवादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ॥ क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम् ॥७१॥
ॐ तेन कार्मुकनिषक्तमुष्टिना राघवो विगतभीः पुरोगतः ॥ अङ्गुलीविवरचारिणं शरं कुर्वता निजगदे
र०वं युयुत्सुना ॥७२॥ क्षत्रजातमपकारवैरि मे तन्निहत्य बहुशः शमं गतः ॥ सुप्तसर्प इव दंडघट्टनाद्रुषि
६० तोऽस्मि तव विक्रमश्रवात् ॥७३॥ मैथिलस्य धनुरन्यपार्थिवैस्त्वं किलानमितपूर्वमक्षिणोः ॥ तन्
60 निशम्य भवता समर्थये वीर्यशृङ्गमिव भग्नमात्मनः ॥७४॥ अन्यदा जगति राम इत्ययं शब्द उच्च
रित एव मामगात् ॥ व्रीडमावहति मे स संप्रति व्यस्तवृत्तिरुदयोन्मुखे त्वयि ॥७५॥ बिभ्रतोऽस्त्रमच
लेऽपि कुण्ठितं द्वौ रिपू मम मतौ समागसौ ॥ धेनुवत्सहरणाच्च हैहयस्त्वं च कीर्तिमपहर्तुमुद्यतः ॥७६॥ राम ६०

क्षत्रियांतकरणोपिविक्रमस्तेनमामवतिनाजितेत्वयि ॥ पावकस्यमहिमासगण्यतेकक्षवज्ज्वलतिसा
गरेपियः ॥ ७७ ॥ विद्धिचात्तबलमोजसाहरेरैश्वरंधनुरभाजियत्त्वया ॥ खातमूलमनिलोनदीरयैः
पातयत्यपिमृदुस्तटद्रुमं ॥ ७८ ॥ तन्मदीयमिदमायुधंज्ययासंगमय्यसशरंविकृष्यतां ॥ तिष्ठतुप्रध
नमेवमप्यहंतुल्यबाहुतरसाजितस्त्वया ॥ ७९ ॥ कातरोसियदिवोद्गतार्चिषातर्जितःपरशुधारयाम
म ॥ ज्यानिघातकठिनांगुलिर्वृथाबध्यतामभययाचनांजलिः ॥ ८० ॥ एवमुक्तवतिभीमदर्शनेभार्ग
वेस्मितविकंपिताधरः ॥ तद्धनुर्ग्रहणमेवराघवःप्रत्यपद्यतसमर्थमुत्तरम् ॥ ८१ ॥ पूर्वजन्मधनुषास
मागतःसोतिमात्ररुचिदर्शनोभवत् ॥ केवलोपिसुभगोनवांबुदःकिंपुनस्त्रिदशचापलांछितः ॥ ८२ ॥
तेनभूमिनिहितैककोटिनाकार्मुकंचवलिनाधिरोपितं ॥ आपवर्णविकृतिंचभार्गवोदृष्टिधो तद

ॐ साय

र॰ वं॰

६१

61

द्वितीया

वं वासवधृजः ॥८३॥ तावुभावपि परस्परस्थितौ वर्धमानपरिहीनतेजसौ ॥ पश्यति स्म जनता दिनात्य

ये पार्वणौ शशिदिवाकराविव ॥८४॥ तं कृपामृदुरवेक्ष्य भार्गवं राघवः स्खलितवीर्यमात्मनि ॥ स्वं च सं

हितममोघमाशुगं व्याजहार हरसूनुसन्निभः ॥८५॥ न प्रहर्तुमलमस्मि निर्दयं विप्र इत्यभिभवत्यपि

त्वयि ॥ शंस किं गतिमनेन पत्रिणा हन्मि लोकमुत ते मखार्जितं ॥८६॥ प्रत्युवाच तमृषिर्न तत्त्वतस्त्वां न

वेद्मि पुरुषं पुरातनं ॥ गां गतस्य तव धाम वैष्णवं कोपितो ह्यसि मया दिदृक्षुणा ॥८७॥ भस्मसात्कृत

वतः पितृद्विषः पात्रसाच्च वसुधां ससागरां ॥ आहितो जयविपर्ययोऽपि मे श्लाघ्य एव परमेष्ठिना तव

या ॥८८॥ तद्गतिं मतिमतां वरेप्सितां पुण्यतीर्थगमनाय रक्ष मे ॥ पीडयिष्यति न मां खिलीकृता स्वर्ग राम ६१

पद्धतिरभोगलोलुपम् ॥८९॥ प्रत्यपद्यत तथेति राघवः प्राङ्मुखश्च विससर्ज सायकम् ॥ भार्गव

स्यसत्कृतोपिसोभवत्स्वर्गमार्गपरिघोदुरत्ययः ॥ ९०· ॥ राघवोपिचरणौतपोनिधेः क्षम्यतामितिवदन्समस्पृ-
शत् ॥ निर्जितेषुतरसातरस्विनांशत्रुषुप्रणतिरेवकीर्तये ॥ ९१ ॥ राजसत्वमवधूयमातृकंपित्र्यमस्मि
गमितःशमंयदा ॥ नन्वनिंदितफलोमयित्वयानिग्रहोप्ययमनुग्रहीकृतः ॥ ९२ ॥ साधयाम्यहमविघ्न
मस्तुतेदेवकार्यमुपपादयिष्यतः ॥ ऊचिवानितिपुनःसलक्ष्मणंलक्ष्मणाग्रजमृषिस्तिरोदधे ॥ ९३ ॥
तस्मिन्गतेविजयिनंपरिरभ्यरामंस्नेहादमन्यतपितापुनरेवजातम् ॥ तस्याभवत्क्षणशुचःपरितोषला-
भःकक्षाग्निलंघिततरोरिववृष्टिपातः ॥ ९४ ॥ अथपथिगमयित्वाक्लृप्तरम्योपकार्येकतिचिदव-
निपालःशर्वरीःशर्वकल्पः ॥ पुरमविशदयोध्यांमैथिलीदर्शनीनांकुवलयितगवाक्षांलोचनैरंग
नानाम् ॥ ९५ ॥ इतिश्रीरघुवंशेमहाकाव्येकालिदासकृतौ ि ा गो मै द ौ ः ॥ ११ ॥

सीतास्वयंवरो नामैकादशः सर्गः

ॐ निर्विष्टविषयस्नेहः स दशांतमुपेयिवान् ॥ आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि ॥ १ ॥ तं कर्ण
र॰वं॰ मूलमागत्य रामे श्रीर्न्यस्यतामिति ॥ कैकेयीशंकयेवाह पलितच्छद्मना जरा ॥ २ ॥ सा पौरान्पौरकांत
स्य रामस्याभ्युदयश्रुतिः ॥ प्रत्येकं ह्लादयांचक्रे कुल्येवोद्यानपादपान् ॥ ३ ॥ तस्याभिषेकसंभारं क
६२ ल्पितं क्रूरनिश्चया ॥ कैकेयी दूषयामास शोकोष्णैः पार्थिवाश्रुभिः ॥ ४ सा किलाश्वासिता चंडी
62 भर्त्रा तत्संश्रुतौ वरौ ॥ उद्ववामेंद्रसिक्ता भूर्बिलमग्नाविवोरगौ ॥ ५ ॥ तयोश्चतुर्दशैकेन रामं प्राव्राजय
त्समाः ॥ द्वितीयेन सुतस्यैच्छद्वैधव्यैकफलां श्रियम् ॥ ६ ॥ पित्रा दत्तां रुदन्रामः प्राङ्महीं प्रत्यपद्यत प
श्चाद्वनाय गच्छेति तदाज्ञां मुदितोग्रहीत् ॥ ७ ॥ दधतो मंगलक्षौमे वसानस्य च वल्कले ॥ ददृशुर्विस्मितास्त रामः
स्य मुखरागं समं जनाः ॥ ८ ॥ स सीतालक्ष्मणसखः सत्याद्गुरुमलोपयन् ॥ विवेश दंडकारण्यं ॥ ६२

सत्येकं च सतां मनः ॥९॥ राजापि तद्वियोगार्तः स्मृत्वा शापं स्वकर्मजं ॥ शरीरत्यागमात्रेण शुद्धिलाभम
मन्यत ॥१०॥ विप्रोषितकुमारं तद्राज्यमस्तमितेश्वरं ॥ रंध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ ॥११॥
बन्धु
अथानाथाः प्रकृतयो मातृबंधुनिवासिनं ॥ मौलैरानाययामासुर्भरतं स्तंभिताश्रुभिः ॥१२॥ श्रुत्वा त
थाविधं मृत्युं कैकेयीतनयः पितुः ॥ मातुर्न केवलं स्वस्याः श्रियोप्यासीत्पराङ्मुखः ॥१३॥ ससैन्यश्चान्व
गाद्रामं दर्शितानाश्रमालयैः ॥ तस्य पश्यन्ससौमित्रेरुदश्रुर्वसतिद्रुमान् ॥१४॥ चित्रकूटवनस्थं च कथि
संपद्भुक्तोऽनुच्छिष्टोऽर्थ इति केशवः
तस्वर्गतिर्गुरोः ॥ लक्ष्म्या निमंत्रयांचक्रे तमनुच्छिष्टसंपदा ॥१५॥ स हि प्रथमजे तस्मिन्नकृतश्रीपरिग्रहे
परिवेत्तारमात्मानं मेने स्वीकरणाद्भुवः ॥१६॥ तमशक्यमपाक्रष्टुं निदेशात्स्वर्गिणः पितुः ॥ ययाचे पादुके पश्चात्कर्तुं राज्याधिदेवते ॥१७॥ स विसृष्टस्तथेत्युक्त्वा भ्रात्रा नैवाविशत्पुरीं ॥ नंदिग्रा

ॐ
र.वं.
६३
63

मगात्तस्य राज्ये न्यासमिवाभुनक् ॥ १८ ॥ दृढभक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः । मातुः पापस्य भ
रतः प्रायश्चित्तमिवाकरोत् ॥ १९ ॥ रामोऽपि सह वैदेह्या वने वन्येन वर्त्तयन् । चचार सानुजः शान्तो वृ
द्धेक्ष्वाकुव्रतं युवा ॥ २० ॥ प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिं । कदाचिदङ्के सीतायाः शिश्ये किंचि
दिव श्रमात् ॥ २१ ॥ ऐन्द्रिः किल नखैस्तस्या विददार स्तनौ द्विजः । प्रियोपभोगचिह्नेषु पौरोभाग्यमिवा
चरन् ॥ २२ ॥ तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः । आत्मानं मुमुचे तस्मादेकनेत्रव्ययेन सः ॥
२३ ॥ रामस्त्वासन्नदेशत्वाद्भरतागमनं पुनः । आशङ्क्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ॥ २४ ॥ प्र
ययावातिथेयेषु वसन्नृषिकुलेषु सः । दक्षिणां दिशमृक्षेषु वार्षिकेष्विव भास्करः ॥ २५ ॥ बभौ त
मनुगच्छन्ती विदेहाधिपतेः सुता । प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ॥ २६ ॥ अनसूया

दोषैकदृक्कु रामानीतस्य कर्म दुःश्चिह्व दोबह्वातम्

रामः
६३

त्रि दत्तेन

त्रिसृष्टेन पुन्यगंधेन काननम् ॥ सा चकारांगरागेण पुष्पोच्चलितषट्पदम् ॥ २७ ॥ संध्याभ्रकपिशस्तस्य
विराधो नाम राक्षसः ॥ अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥ २८ ॥ स जहार तयोर्मध्ये मैथिलीं लो
कशोषणः ॥ नभोनभस्ययोर्वृष्टिमवग्रह इवांतरे ॥ २९ ॥ तं विनिष्पिष्य काकुत्स्थौ पुरा दूषयति स्थलीं
गंधेनाशुचिना चेति वसुधायां निचख्नतुः ॥ ३० ॥ पंचवट्यां ततो रामः शासनात्कुंभजन्मनः ॥ अनपो
ढस्थितिस्तस्थौ विंध्याद्रिः प्रकृताविव ॥ ३१ ॥ रावणावरजा तत्र राघवं मदनातुरा ॥ अभिपेदे निदा
घार्ता व्यालीव मलयद्रुमम् ॥ ३२ ॥ सा सीतासंनिधावेव तं वव्रे कथितान्वया ॥ अत्यारूढो हि नारी
णामकालज्ञो मनोभवः ॥ ३३ ॥ कलत्रवानहं बाले कनीयांसं भजस्व मे ॥ इति रामो वृषस्यंतीं वृषस्कं
धः शशास तां ॥ ३४ ॥ ज्येष्ठाभिगमनात्पूर्वं तेनाप्यनभिनंदिता ॥ साभूद्रामाश्रया भूयो नदीवो

ॐ भयकृत्तलभाक् ॥३५॥ अथ संरंभं मैथिलीहासः क्षणसौम्यां निनाय तां । निवातस्तिमितां वेलां चंद्रोदय
र.वं. इवोदधेः ॥३६॥ फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां । मृग्याः परिभवो व्याघ्र्यामित्य
६४ वेहि त्वया कृतं ॥३७॥ इत्युक्त्वा मैथिलीं भर्तुरंके निर्विशतीं भयात् । रूपं शूर्पणखा नाम्नः सदृ
64 शं प्रत्यपद्यत ॥३८॥ लक्ष्मणः प्रथमं श्रुत्वा कोकिलामंजुवादिनीं । शिवाघोरस्वनां पश्चाद्बुबुधे
विकृतेति तां ॥३९॥ पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः । वैरूप्यपौनरुक्त्येन भीषणां
तामयोजयत् ॥४०॥ सा वक्रनखधारिण्या वेणुकर्कशपर्वया । अंकुशाकारयांगुल्या तावतर्ज
यदंबरे ॥४१॥ प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधां । रामोपक्रममाचख्यौ रक्षःपरिभवं रा.म:
नवं ॥४२॥ मुखावयवलूनां तां नैर्ऋता यत्पुरो दधुः । रामाभियायिनां तेषां तदेवाभूदमंग ६४

अवयवेषु छिन्नां

रं ॥ ४३ ॥ उदायुधानापततस्तान्दृष्ट्वा नृगैरक्षसां राघवः ॥ निदधौ विजयाशंसां चापे सीतां च लक्ष्मणे ॥ ४४ ॥ एको
दाशरथिः कामं यातुधानाः सहस्रशः ॥ ते तु यावंत एवाजौ तावद्ददृशे स तैः ॥ ४५ ॥ असज्जनेन काकुत्स्थः
प्रयुक्तमथ दूषणं ॥ न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥ ४६ ॥ तं शरैः प्रतिजग्राह खरत्रिशिरसौ
च सः ॥ क्रमशस्ते पुनस्तस्य चापात्सममिवोद्ययुः ॥ ४७ ॥ तैस्त्रयाणां शितैर्बाणैर्यथापूर्वविशुद्धिभिः
आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः ॥ ४८ ॥ तस्मिन्रामशरोत्कृत्ते बले महति रक्षसां ॥ उत्थितं ददृशे
न्यत्तु कबंधेभ्यो न किंचन ॥ ४९ ॥ सा बाणवर्षिणं रामं योधयित्वा सुरद्विषां ॥ अप्रबोधाय सुष्वाप गृध्र
च्छाये वरूथिनी ॥ ५० ॥ राघवास्त्रविदीर्णानां रावणं प्रति रक्षसां ॥ तेषां शूर्पणखैवैका दुःप्रवृत्तिहरा
भवत् ॥ ५१ ॥ निग्रहात्स्वसुराप्तानां वधाच्च धनदानुजः ॥ रामेण निहितं मेने पदं दशसु मूर्द्धसु ॥ ५२ ॥

आत्मनो निरा
कारमिवः

शरौ ब्रह्मा... चर्कर्ते

मरीचिना

ॐ ६५ 65 क्षसा मृगरूपेण वंचयित्वा स राघवौ ॥ जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥ ५३ ॥ तौ सीतान्वेषिणौ गृध्रं
लूनपक्षमपश्यतां ॥ प्राणैर्दशरथप्रीतेरनृणं कंठवर्तिभिः ॥ ५४ ॥ स रावणहृतां ताभ्यां वचसाचष्ट मै
थिलीं ॥ आत्मनः सुमहत्कर्म व्रणैरावेद्य संस्थितः ॥ ५५ ॥ तयोस्तस्मिन्नवीभूतपितृव्यापत्तिदुःखयोः ॥
पितरीवाग्निसंस्कारानंतरा ववृते क्रिया ॥ ५६ ॥ वधनिर्धूतशापस्य कबंधस्योपदेशतः ॥ मुमूर्छ सख्यं
रामस्य समानव्यसने हरौ ॥ ५७ ॥ स हत्वा वालिनं वीरं तत्पदे चिरकांक्षिते ॥ धातोः स्थान इवादेशं
सुग्रीवं संन्यवेशयत् ॥ ५८ ॥ इतस्ततश्च वैदेहीमन्वेष्टुं भर्तृचोदिताः ॥ कपयश्चेरुरार्तस्य रामस्ये
व मनोरथाः ॥ ५९ ॥ प्रवृत्तावुपलब्धायां तस्याः संपातिदर्शनात् ॥ मारुतिः सागरं तीर्णः संसा
रमिव निर्ममः ॥ ६० ॥ दृष्टा विचिन्वता तेन लंकायां राक्षसीवृता ॥ जानकी विषवल्लीभिः परीतेव म

लौषधीः ॥ ६१ ॥ तस्यै भर्तुरभिज्ञानमंगुलीयं ददौ हरिः ॥ प्रत्युद्गतमिवानुष्णैस्तदानंदाश्रुबिंदुभिः ॥ ६२
निर्वाप्य प्रियसंदेशैः सीतामक्षवधोद्धतः ॥ स ददाह पुरीं लंकां क्षणसोढारिनिग्रहः ॥ ६३ ॥ प्रत्यभि
ज्ञानरत्नं च रामायादर्शयत्कृती ॥ हृदयं स्वयमायातं वैदेह्या इव मूर्तिमत् ॥ ६४ ॥ स प्राप हृदयन्य
स्तमणिस्पर्शनिमीलितः ॥ अपयोधरसंसर्गां प्रियालिंगननिर्वृतिं ॥ ६५ ॥ श्रुत्वा रामः प्रियोदं
तं मेने तत्संगमोत्सुकः ॥ महार्णवपरिक्षेपं लंकायाः परिखालघुं ॥ ६६ ॥ स प्रतस्थेरिनाशाय हरि
सैन्यैरनुद्रुतः ॥ न केवलं भुवः पृष्ठे व्योम्नि संबाधवर्त्मभिः ॥ ६७ ॥ निविष्टमुदधेः कूले तं प्रपेदे वि
भीषणः ॥ स्नेहाद्राक्षसलक्ष्म्येव बुद्धिमाविश्य चोदितः ॥ ६८ ॥ तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघ
वः ॥ काले खलु समारब्धाः फलं बध्नंति नीतयः ॥ ६९ ॥ स सेतुं बंधयामास प्लवगैर्लवणांबुधौ

पारीक्षां मोह बन्धानिकाछाति

रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः ॥७०॥ तेनोत्तीर्य पथा लंकां रोधयामास पिंगलैः । द्विती
यं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ रणः प्रववृते तत्र भीमः प्लवगरक्षसां ॥ दिग्विजृंभितकाकुत्स्थ
पौलस्त्यजयघोषणः ॥७२॥ पादपाविद्धपरिघः शिलानिष्पिष्टमुद्गरः ॥ अतिशस्त्रनखन्यासः
शैलभग्नमतंगजः ॥७३॥ युग्मं ॥ अथ रामशिरश्छेददर्शनोद्भ्रान्तचेतनां ॥ सीतां मायेति शंसन्ती त्रिज
टा समजीवयत् ॥७४॥ कामं जीवति मे नाथ इति सा विजहौ शुचं ॥ प्राङ्मत्वा सत्यमस्यांतं जीवितास्मी
ति लज्जिता ॥७५॥ गरुडापातविश्लिष्टमेघनादास्त्रबंधनः ॥ दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवा
भवत् ॥७६॥ ततो बिभेद पौलस्त्यः शक्त्या वक्षसि लक्ष्मणं ॥ रामस्त्वनाहतोऽप्यासीद्विभिन्नहृदयः
शुचा ॥७७॥ स मारुतिसमानीतमहौषधिहतव्यथः ॥ लंकास्त्रीणां पुनश्चक्रे विलापाचार्यकं श

र. वं. ६६

66

दुःखेनापि दु
स्त्रीलज्जामर
इति भावः ॥२८

रामः ६६

नखाग्रः

रैः ॥७८॥ नादत्तमे यन्नादत्स्य धनुष्मेद्राघुर्धभम् ॥ मेघस्यैव श्रमत्कालो न किंचित्पश्यशोषयत् ॥७९॥
क्लेशेन महतीं निद्रां त्याजितं रणदुर्जयम् ॥ रावणः प्रेषयामास युद्धायानुजमात्मनः ॥८०॥ जया
नखाग्रनातः नंसतदादेशात्कपीनुग्राननेकशः ॥ विवेशाथ पुरीं लंकां समादाय हरीश्वरं ॥८१॥ कुंभकर्णः कपी
डेण तुल्यावस्थः स्वसुस्ततः ॥ रोधरामं सुग्रीवं छिन्नमनः स्थितः ॥८२॥ अकाले बोधितो
भ्रात्रा प्रियस्वप्नो निशाचरः ॥ रामेषुभिर्तीवासौ दीर्घनिद्रां प्रवेशितः ॥८३॥ इतराण्यपि रक्षां
सि पेतुर्वानरकोटिषु ॥ रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥८४॥ निर्ययावथ पौलस्
त्यः पुनर्युद्धाय मंदिरात् ॥ अरावणमरामं वा जगदद्येति निश्चितः ॥८५॥ रा[illegible]मं पदातिमालो
क्य लंकेशं च वरूथिनं ॥ देवस्स्तां भुजालंबी जैत्रमध्यास्त राघवः ॥८६॥ मातलिस्तस्य माहेंद्र

हरेः युग्यैरथं तस्मै प्रजिताय पेतुरंदरः तं मा[illegible] मों कर्णसु[illegible]॥
अजितारे

भुजमूर्धोरु =

ॐ मामुमोचतत्तुच्छच्छम् ॥ यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषां ॥ ८९ ॥ अन्योन्यदर्शनप्राप्तवि

रा० व० क्रमावसरं चिरात् ॥ रामरावणयोर्वैरं चरितार्थमिवाभवत् ॥ ९० ॥ भुजोत्समाशाबाहुल्यादेकोऽपि ध

६७ नदानुजः ॥ ८ ददृशे सयथापूर्वं मातृवंश इव स्थितः ॥ ९१ ॥ जेतारं लोकपालानां स्वमुखैरर्चितेश्वरं ॥ रा

67 मस्तुलितकैलासमरातिं बह्वमन्यत ॥ ९२ ॥ तस्य स्फुरति पौलस्त्यः सीतासंगमशंसिनि ॥ निच

खानाधिकक्रोधः शरं सव्येतरे भुजे ॥ ९३ ॥ रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ॥ विवेश

भुवमाख्यातुं भुजंगेभ्य इव प्रियम् ॥ ९४ ॥ वचसैवं तयोर्वाक्यमस्त्रमस्त्रेण निघ्नतोः ॥ अन्योन्य

जयसंरंभो ववृधे वा...रिव ॥ ९५ ॥ विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि ॥ जयश्रीरन्तरा वे राम:

दिमत्तवारणयोरिव ॥ ९६ ॥ कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः ॥ परस्परशराव्राताः पुष्प ६७

दिनोर

रक्षितं न सेहिरे ॥ ९७ ॥ अयःशंकुचितां रक्षः शतघ्नीमथ शत्रवे । हृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत् ॥ ९८ ॥
राघवो रथमप्राप्तां तामाशां च सुरद्विषः ॥ अर्द्धचंद्रमुखैर्बाणैश्चिच्छेद कदलीमिव ॥ अमोघं संदधे रामो धनुष्ये-
कधनुर्द्धरः ॥ ब्राह्ममस्त्रं प्रियाशोकशल्यनिष्कर्षणौषधम् ॥ १०० ॥ तद्व्योम्नि शतधा भिन्नं ददृशे दीप्तिमन्मुखं
वपुर्महोरगस्येव करालफणमंडलम् ॥ १०१ ॥ तेन मंत्रप्रयुक्तेन निमेषार्द्धादपातयत् ॥ रामो रिपुशिरःपंक्ति-
मज्ञातव्रणवेदनां ॥ १०२ ॥ बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ॥ रराज रक्षःकायस्य कंठच्छेदपरंपरा ॥
१०३ ॥ मरुतां पश्यतां तस्य शिरांसि पतितान्यपि ॥ मनो नातिविशश्वास पुनःसंधानशंकया ॥ १०४ ॥ अथ
मदगुरुपक्षैर्लोकपालद्विपानामनुगतमलिवृंदैर्गंडभित्तीर्विहाय ॥ उपनतमणिबंधे मूर्ध्नि पौलस्त्यशत्रोः
सुरभिसुरविमुक्तं पुष्पवर्षं पपात ॥ १०५ ॥ यंता हरेः सपदि संहृतकार्मुकज्यमापृच्छ्य राघवमनुष्ठितदेवका

श्री

यं॥ नामांकरावणशरांकितकेतुयष्टिमूर्द्ध्वं रथं हरिसहस्रयुजं निनाय॥ १०६॥ रघुपतिरपि जातवेदोवि
श्री र. वं. शुद्धां प्रगृह्य प्रियां प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः॥ रविसुतसहितेन तेनानुयातः ससौमित्रिणा
६८ भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीं॥ १०७॥ इति श्री रघुवंशे महाकाव्ये कालिदासकृतौ रावणव
68 धोनाम द्वादशः सर्गः॥ १२॥ अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः रत्नाकरं वीक्ष्य मि
थः सजायां रामाभिधानो हरिरित्युवाच॥ १॥ वैदेहि पश्यामलयाद्विभक्तं मत्सेतुना फेनिलमंबुराशिं॥
छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारं॥ २॥ गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते
तुरंगे तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्द्धितो नः॥ ३॥ गर्भं दधत्यर्कमरीचयोस्माद्विवृद्धिम राम ६८
त्राश्नुवते वसूनि॥ अबिंधनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन॥ ४॥ तां तामवस्थां प्रतिपद्य

दौः=

मानं स्थितं दश व्याप्य दिशो महिम्ना ॥ विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥ ५ ॥ नाभिप्ररू
ढांबुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ॥ अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोधिशेते ॥ ६ ॥
पक्षच्छिदा गोत्रभिदात्तगर्वाः शरण्यमेनं शतशो महीध्राः ॥ नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममा
श्रयंते ॥ ७ ॥ रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः ॥ अस्याच्छमंभः प्रलयप्रवृद्धं मु
व हूर्तवक्त्राभरणं बभूव ॥ ८ ॥ मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरंगाधरदानदक्षः ॥ अनन्यसामान्यकल
त्रवृत्तिः पिबत्यसौ पाययते च सिंधूः ॥ ९ ॥ ससत्त्वमादाय नदीमुखांभः संमीलयंतो विवृताननत्वात् ॥ अमी
शिरोभिस्तिमयः सरंध्रैरूर्ध्वं वितन्वंति जलप्रवाहान् ॥ १० ॥ मातंगनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य
समुद्रफेनान् ॥ कपोलसंसर्पितया य एषां व्रजंति कर्णक्षणचामरत्वं ॥ ११ ॥ वेलानिलाय प्रसृता भुजं

गा महोर्मिविस्फूर्जितनिर्विशेषाः ॥ सूर्यांशुसंपर्कसमृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः ॥१२॥ तवा
रा॰ धरस्पर्द्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ॥ ऊर्ध्वांकुरप्रोतमुखं कथंचित् क्लेशादपक्रामति शंखयू
र॰ वं॰ थं ॥१३॥ प्रवृत्तमात्रेण पयांसि पातुमावर्त्तवेगाद्भ्रमता घनेन ॥ आभाति भूयिष्ठमितः समुद्रः प्रमथ्य
६९ मानो गिरिणेव भूयः ॥१४॥ दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला ॥ आभाति वेला ल
69 वणाम्बुराशेर्धारानिबद्धेव कलंकरेखा ॥१५॥ वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि
मामक्षमं मंडनकालहानेर्वेत्तीव बिंबाधरबद्धतृष्णं ॥१६॥ एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं प रामः
योधेः ॥ प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालं ॥१७॥ कुरुष्व तावत्करभोरु पश्चान्मा ६९
र्गे मृगप्रेक्षिणि दृष्टिपातं ॥ एषा हि दूरीभवतः समुद्रात्सकानना निष्पततीव भूमिः ॥१८॥ क्वचि

त्रगा नी

१ त्वयासंवरतैर्धनानांकविल्सुराणांमननांकविंञ्चु ॥ यथाविधौमेमनसोभिलाषः प्रवर्त्ततेपश्यतथाविमानं ॥ १९ ॥
म्रे ञ्चसौमहेन्द्रद्विपदानगंधिस्त्रिमार्गगावीचिविमर्दशीतः ॥ आकाशवायुर्दिनयौवनोत्थानाचामतिस्वेद
विते लवान्मुखेते ॥ २० ॥ करेणवातायनलंबितेनस्पृष्टस्त्वयाचंडिकुतूहलिन्या ॥ आमुंचतीवाभरणंद्वितीय
मुद्भिन्नविद्युद्वलयोघनस्ते ॥ २१ ॥ अमीजनस्थानमपोढविघ्नंमत्वासमारब्धनवोटजानि ॥ अध्यासतेचीर
स्त्र २ भृतोयथास्वंचिरोज्झितान्याश्रममंडलानि ॥ २२ ॥ सैषास्थलीयत्रविचिन्वतात्वांभ्रष्टंमयानूपुरमेकमुर्व्यां ॥
अदृश्यतत्वच्चरणारविंदविश्लेषदुःखादिवबद्धमौनं ॥ २३ ॥ त्वंरक्षसाभीरुयतोपनीतातंमार्गमेताःकृपयालता
मे ॥ अदर्शयन्वक्तुमशक्नुवत्यःशाखाभिरावर्जितपल्लवाभिः ॥ २४ ॥ मृग्यश्चदर्भांकुरनिर्व्यपेक्षास्त
वागतिज्ञंसमबोधयन्मां ॥ व्यापारयंत्योदिशिदक्षिणस्यामुत्पक्ष्मराजीनिविलोचनानि ॥ २५ ॥ एतद्गि

र्माल्यवतः पुरस्तादाविर्भवत्यंबरलेखिशृंगः ॥ नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टं ॥ २६
ॐ गंधश्च धाराहतपल्वलानां कादंबमर्द्धोद्गतकेसरं च ॥ स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि वि-
र॰ वं॰ ना त्वया मे ॥ २७ ॥ पूर्वानुभूतं स्मरता च रात्रौ कंपोत्तरं भीरु तवोपगूढं ॥ गुहाविसारीण्यतिवाहितानि मया
७॰ कथंचिद्घनगर्जितानि ॥ २८ ॥ आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः ॥ विडंब्यमाना
नवकंदलैस्ते विवाहधूमारुणलोचनश्रीः ॥ २९ ॥ उपांतवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि
दूरावतीर्णा पिबतीव खेदादमूनि पंपासलिलानि दृष्टिः ॥ ३० ॥ अत्रावियुक्तानि रथांगनाम्नामन्योन्यद- राम:
त्तोत्पलकेसराणि ॥ द्वंद्वानि दूरांतरवर्त्तिना ते मया प्रिये सस्पृहमीक्षितानि ॥ ३१ ॥ इमां तटाशोकलतां च ७०
तन्वीं स्तनाभिरामस्तवकाभिनम्रां ॥ त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः ॥ ३२ ॥

अमूर्विमानांतरलंबिनीनांश्रुत्वास्वनंकांचनकिंकिणीनां॥प्रत्युद्व्रजंतीवखमुत्पतंत्योगोदावरीसार-
सपंक्तयस्त्वां॥३३॥एषात्वयापेशलमध्ययापिघटांबुसंवर्द्धितबालचूता॥आह्लादयत्युन्मुखकृष्ण-
सारादृष्टाचिरात्पंचवटीमनोमे॥३४॥अत्रानुगोदंमृगयानिवृत्तस्तरंगवातेनविनीतखेदः॥
रहस्त्वदुत्संगनिषण्णमूर्द्धास्मरामिवानीरगृहेषुसुप्तः [शायनं] ॥३५॥भ्रूभंगमात्रेणपदान्मघोनःप्रभ्रंशयां
योनहुषंप्रमनस्र॥तस्याविलांभःपरिशुद्धिहेतोर्भौमोमुनेःस्थानपरिग्रहोऽयं॥३६॥त्रेताग्निधूमा-
की = ग्रमनिंद्यकीर्तेस्तस्येदमाक्रांतविमानमार्गं॥घ्रात्वाहविर्गंधिरजोविमुक्तःसमश्नुतेमेलघिमान-
मात्मा॥३७॥एतन्मुनेर्मानिनिशातकर्णेःपंचाप्सरोनामविहारवारि॥आभातिपर्यंतवनंविदू-

शान्तकर्णि:

ॐ तं न्मेघोन्तरा लक्ष्यमिवेंदु विम्बम् ॥ ३८ ॥ पुरासंदर्भांकुरमात्रवृत्तिं स्थ्वरंस्मरगैः सार्द्दमृषिमियोना ॥ समा

र०वं· धिभीतेनं किलोपनीतः पंचाप्सरोयौवनकूटबंधं ॥ ३९ ॥ तस्यायमंतर्हितसौधभाजः प्रसक्तसंगीतम

७१ दंगघोषः ॥ वियद्गतः पुष्पकचंद्रशालाः क्षणं प्रतिश्रुन्मुखरा करोति ॥ ४० ॥ हविर्भुजामेधवतां च

७। तस्मिन्मघोनस्तपसः सपत्नि ॥ असौ तपस्यंतपरस्तपस्वीनामाग्रतीक्ष्णा श्रवितिनेनदांतः ॥ ४१ ॥

। स्मरं सहासं गृहितेक्षणानि व्याजार्द्धसंदर्शितमेखलानि ॥ नालं विकर्त्तुं जनितेंद्रशंकं सुरांगनाविभ्र

मचेष्टितानि ॥ ४२ ॥ वाचंयमत्वात्प्रणतिं ममैष कंपेन किंचित्प्रतिगृह्य मूर्द्धः ॥ दृष्टिं विमानव्यवधा राम

नमुक्तां पुनः सहस्राक्षिषि संनिधत्ते ॥ ४३ ॥ एषोद्य मालावलयं मृजाणां कंठूयितारं कुश सूचि ७१

सं भावयन्त्या

लावम्र ॥ सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥ ४४ ॥ अदः शरण्यं शरभङ्गनाम्न

स्तपोवनं पावनमाहिताग्नेः ॥ चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥ ४५ ॥

छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु ॥ तस्यातिथीनामधुना सपर्या स्थि

ता सुपुत्रेष्विव पादपेषु ॥ ४६ ॥ धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ॥ बध्ना

ति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ॥ ४७ ॥ एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरा

न्तरभावतन्वी ॥ मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥ ४८ ॥ अयं सुजातो दूरतो

गिरेस्समीपेन तटस्थ ऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ॥ यवाङ्कुरापाण्डुकपोलशोभी मयावतंसः परिक

लंबी

श्री

र॰वं॰

७२

७२ चा

स्थितमस्ति ॥४९॥ अनिग्रहत्रासविनीतसत्त्वमपुष्पलिंगात्फलबंधिवृक्षं ॥ वनंतपःसाधनमेतदत्रेरावि
ष्कृतोदग्रतरप्रभावम् ॥५०॥ अत्राभिषेकायतपोधनानांसप्तर्षिहस्तोद्धृतहेमपद्मां ॥ प्रवर्त्तयामास
किलानुसूयात्रिस्रोतसंत्र्यंबकमौलिमालां ॥५१॥ वीरासनैर्ध्यानजुषामृषीणाममीसमध्यासितवे
दिमध्याः ॥ निर्वातनिष्कंपतयाविभांतियोगाधिरूढाइवशाखिनोपि ॥५२॥ त्वयापुरस्तादुप
याचितोयःसोयंवटःश्यामइतिप्रतीतः ॥ राशिर्मणीनामिवगारुडानांसपद्मरागःफलितोविभा
ति ॥५३॥ क्वचित्प्रभालेपिभिरिंद्रनीलैर्मुक्तामयीयष्टिरिवानुविद्धा ॥ अन्यत्रमालासितपंकजानामिं राम:
दीवरैरुत्खचितांतरेव ॥५४॥ क्वचित्खगानांप्रियमानसानांकादंबसंसर्गवतीवपंक्तिः ॥ अन्यत्रशुभ्रा ७२

द्यन

शरदभ्रलेखारंध्रेष्विवालक्ष्यनभःप्रदेशा ।।५६।। क्वचित्प्रभाचांद्रमसीतमोभिश्छायाविलीनैःशबलीकृ

तेव ।। अन्यत्रकालागुरुदत्तपत्राभक्तिर्भुवश्चंदनकल्पितेव ।।५७।। क्वचिच्चकृष्णोरगभूषणेवभस्मांग

रागातनुरीश्वरस्य ।। पश्यानवद्यांगिविभातिगंगाभिन्नप्रवाहायमुनातरंगैः ।।५८।। चतुर्भिःका

लापकं ।। नितांतमच्छस्फटिकोक्षयोगाद्वैडूर्यकान्त्यारसनावलीव गंगारवेरात्मजयासमेतापु

ष्णातुदारंपरभागमेषा ।।५८।। तमिस्रयाशुभ्रनिशेवभिन्नाकुंदस्रगिंदीवरमालयेव ।। कृत्तिर्हि — दृश्यं दर्शनार्द्ध मर्द्धं यस्याः सा

रेःकृष्णमृगत्वचेवंभातिःस्मरारेरिवकंठभासा ।।५९।। दृश्यार्द्धयाशारदमेघलेखानिर्द्धौतनिस्त्रिं

दिवा आकाशेन — शरुचादिवेव ।। गवाक्षकालागुरुधूमराज्याहर्म्यस्थलींलेपसुधांनवेव ।।६०।। तुषारसंघातशिला

हिमाद्रेर्जालंजनग्रस्तरत्नोभयेव ।। पतत्रिणांमानसरोवराणांश्रेणीवकादंबविहंगमानां ।।६१।।

न्ति

ॐ र.वं. ७२ 73

आदिकुत्स्यं ।। समुद्रपत्न्योर्जलसंन्निपाते पूतात्मनामत्र किलाभिषेकात् ।। तत्वावबोधेन विनापि भूय
स्तनुत्यजां नास्ति शरीरबंधः ।।६२।। पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ।। जटा
सु बद्धास्वरुदत्सुमंत्रः कैकेयि कामाः फलितास्तवेति ।।६३।। पयोधरैः पुण्यजनांगनानां निर्विष्ट
हेमांबुजरेणु यस्याः ।। ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरंति ।।६४।। जलानि या तीरनि
खातयूपैर्वहत्ययोध्यामनुराजधानीं ।। तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृता
नि ।।६५।। यां सैकतोत्संगसुखोचितानां पुण्यैः पयोभिः परिवर्द्धितानां ।। सामान्यधात्रीमिव मा
नसं मे संभावयत्युत्तरकोशलानां ।।६६।। सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता
दूरेपि संतं शिशिरानिलैर्मां तरंगहस्तैरुपगूहतीव ।।६७।। कालापकं ।। विरक्तसंध्यापरुषं पु

राम: ७२

रक्तोघ्यथा रजः पार्थिवमुज्झिहीते ॥ शंके हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥६८॥ अद्धा
श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः ॥ हत्वा निवृत्ताय मृधे खरादीन्संरक्षितां त्वामिव लक्ष्म
णो मे ॥६९॥ असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ॥ वृद्धैरमात्यैः सह चीरवासा माम
र्घपाणिर्भरतोभ्युपैति ॥७०॥ पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्कगतामभोक्ता ॥ इयन्ति वर्षाणि
तया सहोग्रमभ्यस्यतीव व्रतमासिधारं ॥७१॥ एतावदुक्तवति दाशरथौ तदीयामिच्छां विमानमधिदेव
तया विदित्वा ॥ ज्योतिष्पथादवततार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥७२॥ तस्मा
त्पुरःसरविभीषणदर्शितेन सेवाविचक्षणहरीश्वरदत्तहस्तः ॥ यानादवातरददूरमहीतलेन मार्गेण
भङ्गिरचितस्फटिकेन रामः ॥७३॥ इक्ष्वाकुवंश्यगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घ्यपरिग्रहान्ते ॥ प
र्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके ॥७४॥ श्मश्रुप्रवृद्धिजनिताननन

वा नूठ मीली ; त्रुयोग: ग्रन्थ:

ॐ किंचिक्रियांस्तानुपस्थितान्प्ररोहजटानिवमंत्रिवृद्धान् ॥ अन्वग्रहीत्प्रणमतःशुभदृष्टिपातैर्वार्त्तानुयोगमधुरा
र.वं. क्षरयाचवाचा ॥ ७५ ॥ दुःखेकवंधुरयमृक्षहरीश्वरोमेपौलस्त्यएषसमरेषुपुरःप्रहर्त्ता ॥ इत्यादृतेनकथि
तौरघुनंदनेनव्युत्क्रम्यलक्ष्मणमुभौभरतोववंदे ॥ ७६ ॥ सौमित्रिणातदनुसंससृजेसचैनमुत्थाप्यनम्रशि
७४ रसंभृशमालिलिंग ॥ रूढेंद्रजित्प्रहरणव्रणकर्कशेनक्लिश्यन्निवास्यभुजमध्यमुरःस्थलेन ॥ ७७ ॥
७५ रामाज्ञयाहरिचमूपतयस्तदानींकृत्वामनुष्यवपुरारुरुहुर्गजेंद्रान् ॥ येषुक्षरत्सुबहुधामदवारिधा
राःशैलाधिरोहणसुखान्युपलेभिरेते ॥ ७८ ॥ सानुप्लवःप्रभुरपिक्षणदाचराणांभेजेरथंदशरथप्रभवा
लिपत विधे नुशिष्टः ॥ मायाविकल्परचितैरपियेतदीयैर्नस्यंदनैस्तुलितकृत्रिमभक्तिशोभाः ॥ ७९ ॥ भूयस्ततोरघुपति राम:
र्विलसत्पताकमध्यास्तकामगतिसावरजोविमानं ॥ दोषातनंबुधबृहस्पतियोगदृश्यस्तारापति ७४

विप

त्ता हृदम क्रोटम जगदीश्वरेण कर्णवयं

त्तरलविद्युद्भिवाभ्रवेऽम् ॥८०॥ तत्रेश्वरेण जगतां प्रलयादिवोर्वीं वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ॥(
रामेण मैथिलसुतां दशकंठकृछ्रात्प्रत्युद्धृतां धृतिमतीं भरतो ववंदे ॥८१॥ लंकेश्वरप्रणतिभंगदृढव्रतं
तद्वंद्यं युगं चरणयोर्जनकात्मजायाः ॥ ज्येष्ठानुवृत्तिजटिलं च शिरोस्य साधोरन्योन्यपावनमभूदुभयं स
मेत्य ॥८२॥ क्रोशार्द्धं प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण शत्रुघ्नप्रतिविहितो
पकार्यमार्यः साकेतोपवनमुदारमध्युवास ॥८३॥ इति श्री रघुवंशे महाकाव्ये कविकालिदास
कृतौ श्रीरामपुरप्रवेशो नाम त्रयोदशः सर्गः ॥१३॥ भर्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र
समं प्रपन्ने ॥ अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ ॥१॥ उभावुभाभ्यां प्रणतौ ह
तारी यथाक्रमं विक्रमशोभिनौ तौ ॥ विस्पष्टमस्रान्धतया न दृष्टौ ज्ञातौ सुतस्पर्शसुखोपलंभात् ॥२॥

भीसि दुर्लभे

।। अथ्यासत्तौ तत्र विरहवासाद् अपश्यतां दाशरथी जनन्यौ ।। कुमुद्वती शीतमरीचिवत्तौ वेदिर्वै वल्लभान्तरदुर्विभाव्ये ।।

डो ३ ।। आनंदजः शोकजमश्रुबाष्पस्तयोरशीतं शिशिरो बिभेद ।। गंगासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिस्यंद इवा-

र.वं. वतीर्णः ।। ४ ।। ते पुत्रयोर्नैरृतशस्त्रमार्गानार्द्रानिवांगे सदयं स्पृशन्त्यौ ।। अपीप्सितं क्षत्रकुलांगनानां न वीरसू-

७५ शब्दमकामयेतां ।। ५ ।। क्लेशावहा भर्तुरलक्षणाहं सीतेति नाम स्वमुदीरयन्ती ।। स्वर्गप्रतिष्ठस्य गुरोर्महिष्या-

75 वभक्तिभेदेन वधूर्ववंदे ।। ६ ।। तुत्तिष्ठ वत्से ननु सानुजोऽसौ वृत्तेन भर्त्ता शुचिना तवैव ।। कृच्छ्रं महत्तीर्ण इ-

ति प्रियार्हां तामूचतुस्ते प्रियमप्यमिथ्या ।। ७ ।। अथाभिषेकं रघुवंशकेतोः प्रारब्धमानंदजलैर्जनन्योः ।।

निर्वर्तयामासुरमात्यवृद्धास्तीर्थाहृतैः कांचनकुंभतोयैः ।। ८ ।। सरित्समुद्रान्सरसीश्च गत्वा रक्षःक- राम:

पीन्द्रैरुपपादितानि ।। तस्यापतन्मूर्ध्नि जलानि जिष्णोर्विंध्यस्य मेघप्रभवा इवापः ।। ९ ।। तपस्विवेष- ७५

क्रिययापि तावद्यः प्रेक्षणीयः सुतरां बभूव ।। राजेन्द्रनेपथ्यविधानशोभा तस्योदितासीत्पुनरुक्त

दोषा॥१०॥ समौलरक्षोहरिभिः ससैन्यस्तूर्यस्वनानंदितपौरवर्गः॥ विवेशसौधोद्गतलाजवर्षामुत्तो
रणामन्वयराजधानीं॥११॥ सौमित्रिणा सावरजेन मंदमाधूतवालव्यजनो रथस्थः॥ धृतातपत्रो भ
रतेन साक्षादुपायसंघात इव प्रवृद्धः॥१२॥ युग्मं॥ प्रासादकालागुरुधूमराजिस्तस्याः पुरोवायुव
शाद्विभिन्ना॥ वनान्निवृत्तेन रघूद्वहेन मुक्ता स्वयं वेणिरिवाबभासे॥१३॥ स्वश्रूजनानुष्ठितचारुवेषां
कर्णीरथस्थां रघुवीरपत्नीं॥ प्रासादवातायनदृश्यबंधैः साकेतनार्योऽञ्जलिभिः प्रणेमुः॥१४॥ स्फु
रत्प्रभामंडलमानसूयं सा बिभ्रती शाश्वतमंगरागं॥ रराज शुद्धेति पुनः स्वपुर्यै संदर्शिता वह्निगतेव
भर्त्रा॥१५॥ वेश्मानि रामः परिवर्हवंति विश्राण्य सौहार्दनिधिः सुहृद्भ्यः॥ वाष्पायमाणो बलि
मन्निकेतमालेख्यशेषस्य पितुर्विवेश॥१६॥ कृतांजलिस्तत्र यदंब सत्यान्नाभ्रश्यत स्वर्गफलाद्गुरुर्नः॥

श्रेनत्तु
स्यां
मनुसूयया।
इदम् तदेव

ॐ
सटिप्प र॰ वं॰
७६
76

तच्चिंत्यमानंसुकृतंतवेत्तिजहारलज्जांभरतस्यमातुः॥१७॥ तथैवसुग्रीवविभीषणादीनुपाचरत्कृत्रि
मसंविधाभिः॥संकल्पमात्रोदितसिद्धयस्तेक्रांतायथाचेतसिविस्मयेन॥१८॥सभाजनायोपगता
न्सदिव्यान्मुनीन्पुरस्कृत्यहतस्यशत्रोः॥शुश्रावतेभ्यःप्रभवादिवृत्तंस्वविक्रमेगौरवमादधानं॥१९॥प्र
तिप्रयातेषुतपोधनेषुसुखादविज्ञातगतार्द्धमासान्॥सीतास्वहस्तोपहृताग्र्यपूजान्रक्षःकपींद्रा
न्विससर्जरामः॥२०॥तच्चात्मचिंतासुलभंविमानंहृतंसुरारेःसहजीवितेन॥कैलासनाथोद्व
हनायभूयःपुष्पंदिवःपुष्पकमन्वमंस्त॥२१॥पितुर्नियोगाद्वनवासमेवंनिस्तीर्यरामःप्रतिप
न्नराज्यः॥धर्मार्थकामेषुसमांप्रपेदेयथातथैवावरजेषुवृत्तिम्॥२२॥सर्वासुमातृष्वपिवत्सल रामः
त्वात्सनिर्विशेषप्रतिपत्तिरासीत्॥षडाननापीतपयोधरासुनेताचमूनामिवकृत्तिकासु॥२३॥ते ७६

नार्थ्यो वा सलोभपराङ्मुखेन तेन घ्नता विघ्नभयं क्रियावान् ॥ तेनास लोकः पितृमान्विनेत्रा तेनैव शोकापनुदेन
पुत्री ॥ २४ ॥ स पौरकार्याणि समीक्ष्य काले रेमे विदेहाधिपतेर्दुहित्रा ॥ उपस्थितश्चारुवपुस्तदीयं कृत्वोप
भोगोत्सुकयेव लक्ष्म्या ॥ २५ ॥ तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु ॥ प्राप्तानि दुः
खान्यपि दण्डकेषु संचिन्त्यमानानि सुखानि भूवुः ॥ २६ ॥ अथाधिकस्निग्धविलोचनेन मुखेन सीता शरपा
ण्डुरेण ॥ आनन्दयित्री परिणेतुरासीदनक्षरव्यञ्जितदोहदेन ॥ २७ ॥ तामङ्कमारोप्य कृशाङ्गयष्टिं वर्णा
न्तराक्रान्तपयोधराग्राम् ॥ विलज्जमानां रहसि प्रतीतः पप्रच्छ रामां रमणोऽभिलाषम् ॥ २८ ॥ सा दृष्ट
नीवारफलानि हिंस्रैः संबद्धवैखानसकन्यकानि ॥ इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोव
नानि ॥ २९ ॥ तस्यै प्रतिश्रुत्य रघुप्रवीरस्तदीप्सितं पार्श्वचरानुयातः ॥ आलोकयिष्यन्मुदितामयोध्यां

प्रासादमभ्रंलिहमारुरोह ॥ ३० ॥ ऋद्धापणं राजपथं स पश्यन्विगाह्यमानां सरयूं च नौभिः ॥ विलासिभि
३ं श्चाध्युषितानि पौरैः पुरोपकंठोपवनानि रेमे ॥ ३१ ॥ स किंवदंतीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः ॥
र॰ वं॰ सर्पाधिराजोरुभुजोपसर्पं पप्रच्छ भद्रं विजितारिभद्रः ॥ ३२ ॥ निर्बंधपृष्टः स जगाद सर्वं स्तुवंति पौ
११ राश्चरितं त्वदीयं ॥ अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः ॥ ३३ ॥ कलत्रनिंदागु
रुणा किलैवमभ्याहतं कीर्त्तिविपर्ययेण ॥ अयोघनेनाय इवाभितप्तं वैदेहिबंधोर्हृदयं विदद्रे ॥ ३४
किमात्मनिर्वादकथामुपेक्षे जायामदोषामुत संत्यजामि ॥ इत्येकपक्षाश्रयविक्लवत्वादासीत्स
दोलाचलचित्तवृत्तिः ॥ ३५ ॥ निश्चित्य सोनन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत ॥ अ राम:
पि स्वदेहात्किमुतेंद्रियार्थाद्यशोधनानां हि यशो गरीयः ॥ ३६ ॥ स सन्निपात्यावरजान्हतौजा ७७

स्तद्विक्रियादर्शनलुप्तहर्षान्॥ दुर्वर्णमात्माश्रयमाचचक्षे तेभ्यः पुनश्चेदमुवाच वाक्यम्॥ ३७॥ रा
जर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयं॥ मत्तः सदाचारशुचेः कलंकः पयोदवातादि
व दर्पणस्य॥ ३८॥ पौरेषु सोऽहं बहुलीभवंतमपां तरंगेष्विव तैलबिंदुं॥ सोढुं न तत्पूर्वमवर्णमीशे आ
लानिकं स्थाणुमिव द्विपेंद्रः॥ ३९॥ तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः॥
त्यक्ष्यामि वैदेहसुतां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव॥ ४०॥ अवैमि चैनामनघेति किं तु लोकाप
वादो बलवान्मतो मे। छाया हि भूमेः शशिनो मलत्वेनिरूपिता शुद्धिमतः प्रजाभिः॥ ४१॥ रक्षोव
धांतो न च मे प्रयासो व्यर्थः स वैरप्रतिमोचनाय॥ अमर्षणः शोणितकांक्षया किं पदा स्पृशंतं द
शति द्विजिह्वः॥ ४२॥ तदेष सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः। यद्यर्थिता नि

हि

ॐ त्तिवाच्यशल्यान्प्राणान्मयाधारयितुंचिरंवः॥४३॥ इत्युक्तवंतंजनकात्मजायांनितांतरूक्षाभिनिवेश

र॰ वं॰ मीशं॥ नकश्चनभ्रातृषुतेषुशक्तोनिषेद्धुमासीदनुमोदितुंवा॥४४॥ सलक्ष्मणंलक्ष्मणपूर्वजन्मावि

७८ लोक्यलोकत्रयगीतकीर्तिः॥ सौम्येतिचाभाष्ययथार्थभाषीस्थितंनिदेशेपृथगादिदेश॥४५॥ प्र

78 जावतीदोहदशंसिनीतेतपोवनेभ्यः स्पृहयालुरेषा॥ सत्वंरथीतद्व्यपदेशनेयांप्रापय्यवाल्मीकिप

दंत्यजैनां॥४६॥ सशुश्रुवान्मातरिभार्गवेणपितुर्निदेशात्प्रहृतंद्विषद्वत्॥ प्रत्यग्रहीदग्रजशासनं

तदाज्ञागुरूणांह्यविचारणीया॥४७॥ अथानुकूलश्रवणप्रतीतांमत्रस्नुभिर्युक्तधुरंतुरंगैः॥ रथं

सुमंत्रप्रतिपन्नरश्मिमारोप्यवैदेहसुतांप्रतस्थे॥४८॥ सानीयमानारुचिरान्प्रदेशान्प्रियंकरोमेप्रि राम: ७८

यइत्यनंदत्॥ नावुद्धकल्पद्रुमतांविहायजातंतमात्मन्यसिपत्रवृक्षं॥४९॥ जुगोपतस्याः प

प्थिं लक्ष्मणाय । संवेशितां एमकृतत्तातदक्षणा ॥ आख्यातमस्यै गुरुणा भाविदुःखं मंत्यंतत्सुप्तप्रियदर्शनेन ॥ ५० ॥
सा दुर्निमित्तोपगमाद्विषादात्सद्यः परिम्लानमुखारविंदा ॥ राज्ञः शिवं सावरजस्य भूयादित्याशशं ज
से करणैरबाह्यैः ॥ ५१ ॥ गुरोर्नियोगाद्वनितां वनांते साध्वीं सुमित्रातनयो विहास्यन् ॥ अवार्यतेवोत्थितवी प्रवार्य
चिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात् ॥ ५२ ॥ रथात्स यंत्रा निगृहीतवाहात्तां भ्रातृजायां पुलिनेवतार्य
सीतयावतहेत्य ध्यतार्यम् ॥ गंगां निषादाहृतनौविशेषस्ततार संधामिव सत्यसंधः ॥ ५३ ॥ अथ व्यवस्थापितवाक्कथंचित्सौमित्रि
रंतर्गतबाष्पकंठः ॥ औत्पातिको मेघ इवाश्मवर्षं महीपतेः शासनमुज्जगार ॥ ५४ ॥ ततोभिषंगा
निलविप्रविद्धा प्रभ्रश्यमानाभरणप्रसूना ॥ स्वमूर्तिलाभप्रकृतिं धरित्रीं लतेव सीता सहसा जगा ज२
म ॥ ५५ ॥ इक्ष्वाकुवंशप्रभवः कथं त्वां त्यजेदकस्मात्पतिरार्यवृत्तः ॥ इति क्षितिः संशयितेव तस्यै ददौ

प्रवेशं जननी न तावत् ॥ ५६ ॥ सा लुप्तसंज्ञा न विवेद दुःखं प्रत्यागतासुः समतप्यतांतः ॥ तस्याः सुमित्रा
त्मजयत्नलब्धो मोहादभूत्कष्टतरः प्रबोधः ॥ ५७ ॥ न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनादृते
र.वं. पि ॥ आत्मानमेव स्थिरदुःखभाजं पुनः पुनर्दुष्कृतिनं निनिंद ॥ ५८ ॥ आश्वास्य रामावरजः सतीं तां
७९ माख्यातवाल्मीकिनिकेतमार्गः ॥ निघ्नस्य मे भर्तृनिदेशरौक्ष्यं देवि क्षमस्वेति बभूव नम्रः ॥ ५९ ॥
७९ सीता तमुत्थाप्य जगाद वाक्यं प्रीतास्मि ते सौम्य चिराय जीव ॥ बिडौजसा विष्णुरिवाग्रजेन भ्रात्रा य
दित्थं परवानसि त्वं ॥ ६० ॥ श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः ॥ प्रजानिषेकं
मयि वर्तमानं सूनोरनुध्यायत चेतसेति ॥ ६१ ॥ वाच्यस्त्वया मद्वचनात्स राजा वह्नौ विशुद्धामपि यत्स
मक्षं ॥ मां लोकवादश्रवणादहासीः श्रुतस्य किं तत्सदृशं कुलस्य ॥ ६२ ॥ कल्याणबुद्धेरथवा तवा रामः
यं न कामचारो मयि शंकनीयः ॥ ममैव जन्मांतरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ॥ ६३ ॥ ७९

उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्द्धमसि प्रपन्नः ॥ त्वयाश्रयं प्राप्य तया तु रोषात्सोढा
स्मि न त्वद्भवने वसंती ॥६४॥ निशाचरोपप्लुतभर्तृकाणां तपस्विनीनां भवतः प्रसादात् ॥ भूत्वा
शरण्या शरणार्थमन्यं कथं प्रपत्स्ये त्वयि दीप्यमाने ॥६५॥ किं वा तवात्यंतवियोगमोघे कुर्यामुपे
क्षां हतजीवितेस्मिन् ॥ स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमंतर्गतमंतरायः ॥६६॥ साहं तपः सू
विष्ट र्यनिविष्टदृष्टिरूर्द्ध्वं प्रसूतेश्चरितुं यतिष्ये ॥ भूयो यथा मे जननांतरेपि त्वमेव भर्ता न च विप्रयोगः ॥६७॥
नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः ॥ निर्वासिताप्येवमतस्त्वयाहं तपस्विसा दी
मान्यमवेक्षणीया ॥६८॥ तथेति तस्याः प्रतिगृह्य वाचं रामानुजे दृष्टिपथं व्यतीते ॥ सा मुक्तकं
ठं व्यसनातिभाराच्चक्रंद विग्ना कुररीव भूयः ॥६९॥ नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्ता

न्तान्विजहुर्हरिण्यः ॥ तस्याः प्रपन्ना समदुःखभावमत्यर्थमासीद्रुदितं वनेऽपि ॥ ७० ॥ तामभ्यगच्छद्रुदि
ॐ तानुसारी कविः कुशेध्माहरणाय यातः ॥ निषाद विद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ७१
र. वं. काश्चिद्वने लक्ष्मणलक्ष्मणैर्निक्षिप्ता नारी रोदिति तिर्यगोषिद्भिः ॥ आज्ञानमेषां जनकात्मजेति कविर्विचिं
२. त्यान्तिकमाजगाम ॥ ७२ ॥ तमश्रु नेत्रावरणं प्रमृज्य सीता विलापाद्विरता ववन्दे ॥ तस्यै मुनिर्दोहद
40 दलिंगदर्शी दत्वा सुपुत्राशिषमित्युवाच ॥ ७३ ॥ ज्ञाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभि
तेन भर्त्रा ॥ तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि पितुर्निकेतं ॥ ७४ ॥ उत्खातलोकत्र
यकंटकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि ॥ त्वां प्रत्यकस्मात्कलुषप्रवृत्तावस्त्येव मन्युर्भरताग्र रामः
जे मे ॥ ७५ ॥ तवोरुकीर्त्तिः श्वशुरः सखा मे सतां भवोच्छेदकरः पिता ते ॥ धुरि स्थिता त्वं प २१

तिदेवतानां किं तन्न येनासि ममानुकंप्या ॥ ७६ ॥ तपस्विसंसर्गविनीतसत्वे तपोवने वीतभया वसास्मिन् । इतो
भविष्यत्यनयप्रसूतेरपत्यसंस्कारमयो विधिस्ते ॥ ७७ ॥ अशून्यतीरां मुनिसंनिवेशैस्तमोपहंत्रीं तमसां
विगाह्य ॥ तत्सैकतोत्संगबलिक्रियाभिः संपत्स्यते ते मनसः प्रसादः ॥ ७८ ॥ पुष्पं फलं चार्तवमाहरंत्यो बी
जं च बालेयमकृष्टरोहि ॥ विनोदयिष्यंति नवाभिषंगामुदारवाचो मुनिकन्यकास्त्वां ॥ ७९ ॥ पयोघटैरा
श्रमबालवृक्षान्संवर्द्धयंती स्वबलानुरूपैः ॥ असंशयं प्राक्तनयोपपत्तेः स्तनंधयप्रीतिमवाप्स्यसि
त्वं ॥ ८० ॥ अनुग्रहप्रत्यभिनंदनीं तां वाल्मीकिरादाय दयार्द्रचेताः ॥ सायं मृगाध्यासितवेदिमध्यं
स्वमाश्रमं शांतमृगं जगाम ॥ ८१ ॥ तामर्पयामास च शोकदीनां तदागमप्रीतिषु तापसीषु ॥ निर्विष्ट
सारां पितृभिर्हिमांशोरंत्यां कलां दर्श इवौषधीषु ॥ ८२ ॥ ता इंगुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिन
तल्पमंतः ॥ तस्यै सपर्यानुपदं दिनांते निवासहेतोरुटजं वितेरुः ॥ ८३ ॥ तत्राभिषेकप्रयता वसंती प्र

ॐ र. वं. ८१

युक्तः प्रजानां विधिनातिथिभ्यः । वन्येन सा वल्कलिनी शरीरं पत्युः प्रजासंततये बभार ॥ ८४ ॥ अपि प्रभुः सानुश
योधुनास्यात्किमुत्सुकः शक्रजितोपि हंता ॥ शशंस सीतापरिदेवनांतमनुष्ठितं शासनमग्रजाय ॥ ८५ ॥ बभू
व रामः सहसा सबाष्पस्तुषारवर्षीव सहस्यचंद्रः ॥ कौलीनभीतेन गृहान्निरस्ता न तेन वैदेहसुता मनस्तः ॥ ८६ ॥
निगृह्य शोकं स्वयमेव धीमान्वर्णाश्रमावेक्षणजागरूकः ॥ स भ्रातृसाधारणभोगमृद्धं राज्यं रजोरिक्तमना
नाः शशास ॥ ८७ ॥ तामेकभार्यां परिवादभीरोः साध्वीमपि त्यक्तवतो नृपस्य ॥ वक्षस्यसंघट्टसुखं वसंती रे
मे सपत्नीरहितेव लक्ष्मीः ॥ ८८ ॥ सीतां हित्वा दशमुखरिपुर्नोपयेमे यदन्यां तस्या एव प्रतिकृतिसखो यत्क्रतूना
जहार ॥ वृत्तांतेन श्रवणविषयप्रापिणा तेन भर्तुः सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ॥ ८९ ॥ इति श्री
रघुवंशे महाकाव्ये कालिदासकृतौ सीतापरित्यागो नाम चतुर्दशः सर्गः ॥ १४ ॥ कृतसीतापरित्यागः स रत्नाक रामः
रमेखलां ॥ बुभुजे पृथिवीपालः पृथिवीमेव केवलां ॥ १ ॥ लवणेन विलुप्तेज्यास्तामिस्रेण तमभ्ययुः ॥ मुनयो ८१

यमुनाभाजः शरण्यो शरणार्थिनः ॥२॥ अवेक्ष्य रामं ते तस्मिन्न प्रजह्रुः स्वतेजसा ॥ त्राणाभावे हि शापास्त्राः कुर्व
न्ति तपसो व्ययं ॥३॥ प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियाम् ॥ धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः ॥ प्रियायाने व्रया त्रायां नार्थ नेते
॥४॥ ते रामाय वधोपायमाचख्युर्विबुधद्विषः ॥ दुर्जयो लवणः शूली विशूलः प्रार्थ्यतामिति ॥५॥ आदिदेशा
थ शत्रुघ्नं तेषां क्षेमाय राघवः ॥ करिष्यन्निव नामास्य यथार्थमरिनिग्रहात् ॥६॥ यः कश्चन रघूणां हि परमे
कः परंतपः ॥ अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः ॥७॥ अग्रजेन प्रयुक्ताशीस्ततो दाशरथी रथी ॥ ययौ
वनस्थलीः पश्यन्पुष्पिताः सुरभीरभीः ॥८॥ रामादेशादनुपदसेनाङ्गं तस्य सिद्धये ॥ पश्चादध्ययनार्थस्य
धातोरधिरिवाभवत् ॥९॥ आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः ॥ विरराज रथप्रष्ठैर्वालखिल्यैरि
वांशुमान् ॥१०॥ तस्य मार्गवशादेका बभूव वसतिर्यतः ॥ रथस्वनोत्कण्ठमृगे वाल्मीकीये तपोवने ॥११॥
तमृषिः पूजयामास कुमारं क्लान्तवाहनम् ॥ तपःप्रभावसिद्धाभिर्विशेषप्रतिपत्तिभिः ॥१२॥ तस्यामेवा

सौमित्रिः सौमनस्यवान्

समचे

ॐ स्थयामित्या मंतर्वत्नी प्रजावती ।। सुतवसूत संपन्ना कोशदंडा विव क्षितिः ।। १३ ।। संतानश्रवणाद्भ्रातुः सौमनस्यम्

र॰ वं॰ पंयवान् ।। प्रांजलिर्मुनिमामंत्र्य प्रातर्युक्तरथो ययौ ।। १४ ।। स च प्राप मधूपघ्नं कुंभीनस्याश्च कुक्षिजः ।। वना

८२ त्करमिवादाय सत्वराशिमुपस्थितः ।। १५ ।। धूमधूम्रो वसागंधी ज्वालाबभ्रुशिरोरुहः ।। क्रव्याद्गणपरीवारश्चि

तामिरिव जंगमः ।। १६ ।। युग्मं ।। अपशूलं तमासाद्य लवणं लक्ष्मणानुजः ।। रुरोध संमुखीनो हि जयो रंध्र

प्रहारिणां ।। १७ ।। नातिपर्याप्तमालक्ष्य मत्कुक्षेरद्य भोजनं ।। दिष्ट्या त्वमसि मे धात्रा भीतेनेवोपपादि

तः ।। १८ ।। इति संतर्ज्य शत्रुघ्नं राक्षसस्तज्जिघांसया ।। प्रांशुमुत्पाटयामास मुस्तस्तंबमिव द्रुमम् ।। १९ ।।

युग्मम् ।। सौमित्रेर्निशितैर्बाणैरंतरा शकलीकृतः ।। गात्रं पुष्परजः प्राप न शाखी नैरृतेरितः ।। २० ।। नि

विनाशात्तस्य / वृक्षस्य राम: नाशात्तस्य वृक्षस्य रक्षस्तस्मै महोपलं ।। प्रजिघाय कृतांतस्य मुष्टिं पृथगिव स्थितं ।। २१ ।। ऐंद्रमस्त्रमुपा

दाय शत्रुघ्नेन स ताडितः ।। सिकतात्वादपि परां प्रपेदे परमाणुतां ।। २२ ।। तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशा ८२

दक्षिणं

चर[illegible]॥ एकताल इवोत्पातपवनप्रेरितो गिरिः॥ २३॥ तीव्रेणापि परित्राणघ्रातो ःसंभिन्नहृदयः पतन्॥ आ
निनाय भुवः कंपं जहाराश्रमवासिनां॥ २४॥ वयसां पंक्तयः पेतुर्हतस्योपरि रक्षसः॥ तत्प्रतिद्वंद्वि
नो मूर्ध्नि दिव्याः कुसुमवृष्टयः॥ २५॥ स हत्वा लवणं वीरं तदा मेने महौजसः॥ भ्रातुः सोदर्यमात्मानमिंद्र
जिद्वधशोभिनः॥ २६॥ तस्य संस्तूयमानस्य चरितार्थैस्तपस्विभिः॥ शुशुभे विक्रमोदग्रं व्रीडयावनतं
शिरः॥ २७॥ उपकूलं स कालिंद्याः पुरीं पौरुषभूषणः॥ निर्ममो ऽर्थेषु मथुरां निर्ममे मधुराकृतिः॥ २८॥
या सौराज्यप्रकाशाभिर्बभौ पौरविभूतिभिः॥ स्वर्गाभिष्यंदवमनं कृत्वेवाविनिवेशिता॥ २९॥ तत्र सौधग
तः पश्यन्यमुनां चक्रवाकिनीं॥ हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये॥ ३०॥ सखा दशरथस्यापि
जनकस्य च मंत्रवित्॥ संचस्कारोभयप्रीत्या मैथिलेयौ यथाविधि॥ ३१॥ स तौ कुशलवोन्मृष्टगर्भक्ले

काल्मेन

शत्रुघ्न

महात्मनाः =

रामस्य मधुरं वृत्तं गायंतौ मातुरग्रतः तद्वियोगव्यथां किंचिच्छिथिलीचक्रतुः सुतौ ३४

ॐ दौ तदाख्यया ॥ कविः कुशलवावेव चकार किल नामतः ॥ ३२ ॥ सांगं च वेदमध्याप्य किंचिदुत्क्रांतशैशवौ
र. वं. स्वकृतिं गापयामास कविः प्रथमपद्धतिं ॥ ३३ ॥ इतरेऽपि रघोर्वं[illegible]श्यास्त्रयस्त्रेताग्नितेजसः ॥ तद्योगा
८३ त्पतिवत्नी[illegible]षु पत्नीष्वासन्द्विसूनवः ॥ ३४ ॥ शत्रुघातिनि शत्रुघ्नः सुबाहौ च बहुश्रुते ॥ मथुरावि
८३ दिशे सून्वोर्निदधे पूर्वजोत्सुकः ॥ ३५ ॥ भूयस्तपोव्ययो मा भूद्वाल्मीकेरिति सोऽत्यगात् ॥ मैथिली
तनयोद्गीतनिःस्पंदमृगमाश्रमं ॥ ३६ ॥ वशी विवेश चायोध्यां [illegible] रुक्षितम
[illegible] ॥ ३७ ॥ [illegible] तमभ्यनंदत्प्रणतं लवणांतकमग्रजः ॥ कालनेमिवधा रामः
त्प्रीतस्तुराषाडिव शार्ङ्गिणं ॥ ३८ ॥ स पृष्टः सर्वतो वार्त्तमाख्यद्राज्ञे न संततिं ॥ प्रत्यर्पयिष्यतः काले ८३
कवेराद्यस्य शासनात् ॥ ४० ॥ अथ कश्चिन्मृतं विप्रः पुत्रमप्राप्तयौवनं ॥ अवतार्यांकशय्यां[illegible]द्वा संः

रथ्यासंस्कारशोभिनीम् लवणस्य वधात्पौरैरीक्षितोऽत्यंतगौरवं ॥ स ददर्श सभामध्ये सभासद्भिरुपस्थितम् रामं सीतापरित्यागादसामान्य
पतिं भुवः ४२

रिवक्रंदम्भूयते ॥ ४१ ॥ शोचनीयासि वसुधे या त्वं दशरथाच्युता । रामहस्तमनुप्राप्य कष्टात्कष्टतरं गता
॥ ४२ ॥ श्रुत्वा तस्य शुचो हेतुं गोप्ता जिह्राय राघवः । न ह्यकालभवो मृत्युरिक्ष्वाकुपदमस्पृशत् ॥ ४३ ॥
स मुहूर्तं क्षमस्वेति द्विजमाश्वास्य दुःखितं । यानं सस्मार कौबेरं वैवस्वतजिगीषया ॥ ४४ ॥ आत्तशस्त्र
स्तदध्यास्य प्रस्थितः स रघूद्वहः । उच्चचार पुरस्तस्य गूढरूपा सरस्वती ॥ ४५ ॥ राजन्प्रजासु ते कश्चिद
पचारः प्रवर्तते । तमन्विष्य प्रशमयेर्भवितासि ततः कृती ॥ ४६ ॥ इत्याप्तवचनाद्रामो विनेष्य
न्वर्णविक्रियां । दिशः पपात पत्रेण वेगनिष्कंपकेतुना ॥ ४७ ॥ अथ धूमाभिताम्राक्षं वृक्षशाखा
वलंबिनं । ददर्श कंचिदैक्ष्वाकस्तपस्यंतमधोमुखं ॥ ४८ ॥ पृष्टनामान्वयो राज्ञा स किलाचष्ट
धूमपः । आत्मानं शंबुकं नाम शूद्रं सुरपदार्थिनं ॥ ४९ ॥ तपस्यनधिकारित्वात्प्रजानां तमघावहं

घा

पृष्ठ=८

ॐ

धि= र०वं० ८४

श्रीर्षछेद्यं परिछिद्य नियंता शस्त्रमाददे ॥५०॥ स तद्वक्त्रं हिमक्लिष्टकिंजल्कमिव पंकजं । ज्योतिःकणाहत-
श्मश्रु कंठनालादपाहरत् ॥५१॥ कृतदंडः स्वयं राज्ञा लेभे शूद्रः सतां गतिं । तपसा दुश्चरेणापि न स्वमा-
र्गविलंघिना ॥५२॥ रघुनाथोप्यगस्त्येन मार्गसंदर्शितात्मना । महौजसा संयुयुजे शरत्काल इवेंदुना ॥५३॥
कुंभयोनिरलंकारं तस्मै दिव्यपरिग्रहं । ददौ दत्तं समुद्रेण पीतेनेवात्मनिष्क्रयं ॥५४॥ तं दधन्मैथिलीकंठनिर्व्या-
२ पारेण बाहुना । पश्चान्निववृते रामः प्राक्परासुर्द्विजात्मजः ॥५५॥ तस्य पूर्वोदितां निंदां द्विजः पुत्रसमागतः
स्तुत्या निवर्त्तयामास त्रातुर्वैवस्वतादपि ॥५६॥ तमध्वराय मुक्ताश्वं रक्षःकपिनरेश्वराः । मेघाः सस्यमिवां-
भोभिरभ्यवर्षन्नुपायनैः ॥५७॥ दिग्भ्यो निमंत्रिताश्चैनमभिजग्मुर्महर्षयः । न भौमान्येव धिष्ण्यानि हि- रामः
त्वा ज्योतिर्मयान्यपि ॥५८॥ उपशल्यनिविष्टैस्तैश्चतुर्द्वारमुखी बभौ । अयोध्या सृष्टलोकेव सद्यः ८४

पैतामहीं तनुः ॥५९॥ भ्राग्यस्त्यागोपि वैदेह्याः पत्युः प्राग्वंशवासिनः ॥ अनन्यजानेर्यस्यासीत्सैव जाया हि
रण्मयी ॥६०॥ विधेरधिकसंभारस्ततः प्रववृते मखः ॥ असन्यत्र क्रियाविघ्ना राक्षसा एव रक्षिणः ॥६१॥
अथ प्राचेतसोपज्ञं रामायणमितस्ततः ॥ मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ ॥६२॥ वृत्तं रामस्य
वाल्मीकेः कृतिस्तौ किन्नरस्वरौ ॥ किं तद्येन मनो हर्तुमलं स्यातां न शृण्वतां ॥६३॥ रूपे गीते च माधुर्यं तयोस्त यं
ज्ज्ञैर्निवेदितं ॥ ददर्श सानुजो रामः शुश्राव च कुतूहली ॥६४॥ वयोवेषविसंवादि रामस्य च तयोस्तदा ॥ ज विलक्षणं
ना क्षि कम्प
नता प्रेक्ष्य सादृश्यं व्रीडापन्ना व्यतिष्ठत ॥६५॥ तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ॥ हिमनिष्यंदिनी हिमनिष्यंदिनी
स्थ
प्रातर्निवातेव वनस्थली ॥६६॥ उभयोर्न तथा लोकः प्रावीण्येन विसिस्मिये ॥ नृपतेः प्रीतिदानेषु वीत-
स्पृहतया यथा ॥६७॥ गेये केन विनीतौ वां कस्य चेयं कवेः कृतिः ॥ इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिम-

इत्यां कर्त्तन यो वाल्मीकिं रामो राजीवलोचनः समं हर्षविषादाभ्यां रघुजे नीतिकोविदः ४

ॐ श्रोसतो ॥ ६९ ॥ अथ स भावराजो रामः प्राचेतसमुपेयिवान् ॥ उरीकृत्यात्मनो देहं राज्यमस्मैन्यवेदयत् ॥ ईदृशी ॥
रा.वं. सतावरैस्यायरामस्य मैथिलेयौ तवात्मजौ ॥ कविः कारुणिको वव्रे सीतायाः संपरिग्रहं ॥ ७० ॥ तातस्त्वद्दु
८५ समक्षं नः स्नुषा ते जातवेदसि ॥ दौरात्म्याद्रक्षसस्तां तु नात्रत्याः श्रद्दधुः प्रजाः ॥ ७१ ॥ ताः स्वचारित्र्यमुद्दिश्य
85 प्रत्याययतु मैथिली ॥ ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया ॥ ७२ ॥ इति प्रतिश्रुते राज्ञा जानकीमाश्रमान्
मुनिः ॥ शिष्यैरानाययामास स्वसिद्धिं नियमैरिव ॥ ७३ ॥ अन्येद्युरथ काकुत्स्थः संनिपात्य पुरौकसः ॥ कवि सूर्यमिवेनाव
रू मापयामास प्रस्तुतप्रतिपत्तये ॥ ७४ ॥ स्वरसंस्कारवत्यैव पुत्राभ्यां सह सीतया ॥ ऋचेवोदर्चिषं सूर्यं रामं
मुनिरुपस्थितः ॥ ७५ ॥ काषायपरिवीतेन स्वपादार्पितचक्षुषा ॥ अन्वमीयत शुद्धेति शान्तेन वपुषैव सा ७६
जनास्तदालोकपथात्प्रतिसंहृतचक्षुषः ॥ तस्थुस्तेऽवाङ्मुखाः सर्वे फलिता इव शालयः ॥ ७७ ॥ अथ वाल्मी रामः
किशिष्येण पुण्यमेवमावर्जितस्पृहः ॥ आश्रमस्यादिशयामास सीतां सत्यां सरस्वतीम् ॥ ७८ ॥ वाग्मनःक ८५
तं दृष्ट्वा विषये भर्तुर्मुनिरास्थितविष्टरः ॥ कुरु निःसंशयं वत्से स्ववृत्ते लोकमित्यशात् २ ७८

ग्भिः पत्यैव्यभिचारोयथानमे॥ तथाविश्वंभरेदेवि मामंतर्धातुमर्हसि॥८०॥ एवमुक्तेतयासाध्व्यारंध्रात्सद्योभवाद्भुवः
शातह्रदमिवज्योतिः प्रभामंडलमुद्ययौ॥८१॥ तत्रनागफणोत्क्षिप्तसिंहासननिषेदुषी॥ समुद्ररशनासाक्षात्प्रादु
रासीद्वसुंधरा॥८२॥ सासीतामंकमारोप्यभर्तृप्रणिहितेक्षणां॥ मामेतिव्याहरत्येवतस्मिन्पातालमभ्यगात् ८३ २=
धरायांतस्यसंरंभंसीताप्रत्यर्पणैषिणः॥ गुरुर्विधिबलापेक्षीशमयामासधन्विनः॥८४॥ ऋषीन्विसृज्ययज्ञां
तेसुहृदश्चपुरस्कृतान्॥ रामःसीतागतंस्नेहंनिदधेतदपत्ययोः॥८५॥ युधाजितस्यसंदेशात्सदेशंसिंधुनामकम्
ददौदत्तप्रभावायभरतायधृतप्रजः॥८६॥ भरतस्तत्रगंधर्वान्युधिनिर्जित्यकेवलम्॥ आतोद्यंग्राहयामाससमत्या
जयदायुधम्॥८७॥ सतक्षपुष्कलौपुत्रौराजधान्योस्तदाख्ययोः॥ अभिषिच्याभिषेकार्हौरामांतिकमुपागमत्
॥८८॥ अंगदंचंद्रकेतुंचलक्ष्मणोप्यात्मसंभवौ॥ शासनाद्रघुनाथस्यचक्रेकारापथेश्वरौ॥८९॥ इत्यारोपित
पुत्रास्तेजननीनांजनेश्वराः॥ भर्तृलोकप्रपन्नानांनिवापान्विदधुःक्रमात्॥९०॥ उपेत्यमुनिवेषेणकालःप्रो

श्री
र. वं.
८६
90

वावं राघवम् ॥ रहः संवादिनौ पश्येदावयोस्त्वं त्यजेति ॥ ९१ ॥ तथेति प्रतिपन्नाय विवृतात्मा नृपाय सः । आचख्यौ दिवमा
रोढुं शासनात्परमेष्ठिनः ॥ ९२ ॥ विद्वानपि तयोर्द्वास्थः समयं लक्ष्मणोभिनत् ॥ भीतो दुर्वाससः शापाद्रामसंदर्शना
र्थिनः ॥ ९३ ॥ गच्छ लक्ष्मण शीघ्रं त्वं माभूद्धर्मविपर्ययः ॥ त्यागो वा यदि वधो वापि साधूनामुभयं समम् ॥ ९४ ॥ स ग
त्वा सरयूतीरे देहत्यागेन योगवित् ॥ चकारावितथां भ्रातुः प्रतिज्ञां पूर्वजन्मनः ॥ ९५ ॥ तस्मिन्नात्मचतुर्भागे प्राङ्ना
कमधितस्थुषि ॥ राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव ॥ ९६ ॥ सन्निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम्
शरावत्यां सतां सूक्तैर्जनिताश्रुलवं लवम् ॥ ९७ ॥ उदक्प्रतस्थे स्थिरधीः सानुजोऽग्निपुरःसरः ॥ अन्वितः पति
वात्सल्याद्गृहवर्जमयोध्यया ॥ ९८ ॥ युग्मम् जगृहुस्तस्य चित्तज्ञाः पदवीं हरिराक्षसाः ॥ कदंबमुकुलस्थूलै
रभिवृष्टां प्रजाश्रुभिः ॥ ९९ ॥ उपस्थितविमानेन तेन भक्तानुकंपिना ॥ चक्रे त्रिदिवनिःश्रेणिः सरयूरनुया राम
यिनाम् ॥ १०० ॥ यद्गोप्रतरकल्पोऽभूत्संमर्दस्तत्र मज्जताम् ॥ अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे ॥ १०१ ८६

णं साधयित्वा

सविभुर्विबुधांशेषु प्रतिपन्नात्ममूर्त्तिषु ॥ त्रिदशीभूतपौराणां स्वर्गान्तरमकल्पयत् ॥ १०२ ॥ निर्वर्त्यैवं दशमुखभ
योच्छेदिकार्यं सुराणां विष्वक्सेनः स्वतनुमविशत्सर्वलोकप्रतिष्ठाम् ॥ लंकानाथं पवनतनयं चोभयं स्थापयि
त्वा कीर्त्तिस्तंभद्वयमिव गिरौ दक्षिणे चोत्तरे च ॥ १०३ ॥ इति श्री रघुवंशे महाकाव्ये स्वर्गारोहणं नाम पंचदशः
सर्गः ॥ १५ ॥ अथेतरे सप्तरघुप्रवीरा ज्येष्ठं पुरोजन्मतया गुणैश्च ॥ चक्रुः कुशं रत्नविशेषभाजं सौभ्रात्रमेषां
हि कुलानुसारि ॥ १ ॥ ते सेतुवार्त्तागजबंधमुख्यैरभ्युच्छ्रिताः कर्मभिरप्यवंध्यैः ॥ अन्योन्यदेशप्रविभागसी
मां वेलां समुद्रा इव न व्यतीयुः ॥ २ ॥ चतुर्भुजांशप्रभवः स तेषां दानप्रवृत्तेरनुपारतानां ॥ सुरद्विपानामिव सा
मयोनिर्भिन्नोऽष्टधा विप्रससार वंशः ॥ ३ ॥ अथार्द्धरात्रे स्तिमितप्रदीपे शय्यागृहे सुप्तजने प्रबुद्धः ॥ कुशः प्रवा
सस्थकलत्रवेषामदृष्टपूर्वां वनितामपश्यत् ॥ ४ ॥ सा साधुसाधारणपार्थिवर्द्धेः स्थित्वा पुरस्तात्पुरुहूतभा
स्प

सः जेतुः परेषां जयशब्दपूर्वं तस्यांजलिं बंधुमतो बबंध ॥ ५ ॥ तां सोनपोढार्गलमप्यगारं छायामिवादर्शतलं प्रविष्टां
उ॰ सविस्मयो दाशरथेस्तनूजः प्रोवाच पूर्वार्धविसृष्टतल्पः ॥ ६ ॥ लब्धांतरा सावरणेपि गेहे योगप्रभावो न च लक्ष्यते ते
र॰ वं॰ बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागं ॥ ७ ॥ का त्वं शुभे कस्य परिग्रहो वा किं वा मदभ्याग
८७ मकारणं ते ॥ आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥ ८ ॥ तमब्रवीत्सा गुरुणानवद्या या नीत
८७ पौरा स्वपदोन्मुखेन ॥ तस्याः पुरः संप्रति वीतनाथां जानीहि राजन्नधिदेवतां मां ॥ ९ ॥ वस्वौकसारामभि
भूय साहं सौराज्यबद्धोत्सवया विभूत्या ॥ समग्रशक्तौ त्वयि सूर्यवंश्ये सति प्रपन्ना करुणामवस्थां ॥ १० ॥
विशीर्णतल्पाट्टशतो निवेशः पर्यस्तशालः प्रभुणा विना मे ॥ विडंबयत्यस्तनिमग्नसूर्यं दिनांतमुग्रानिल राम:
भिन्नमेघं ॥ ११ ॥ निशासु भास्वत्कलनूपुराणां यः संचरोभूदभिसारिकाणां ॥ ज्वलन्मुखोल्काविचि ८७
तामिषाभिः स वाह्यते राजपथः शिवाभिः ॥ १२ ॥ आस्फालितं यत्प्रमदाकराग्रैर्मृदंगधीरध्वनि

१ वृक्षेशया यष्टिनिवासभंगान्मृदंगशब्दापगमादलास्याः ॥ प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वम् ॥ १४ ॥ १

मन्वगच्छत् ॥ वन्यैरिदानीं महिषैस्तदंभः शृंगाहतं क्रोशति दीर्घिकाणां ॥ १३ ॥ सोपानमार्गेषु च येषु रामा निक्षि
प्तवत्यश्चरणान्सरागान् ॥ सद्योहतन्यंकुभिरस्रदिग्धं व्याघ्रैः पदं तेषु निधीयते मे ॥ १४ ॥ चित्रद्विपाः पद्मवना
वतीर्णाः करेणुभिर्दत्तमृणालभंगाः ॥ नखांकुशाघातविभिन्नकुंभाः संरब्धसिंहप्रहृतं वहंति ॥ १५ ॥ स्तंभे
षु योषित्प्रतियातनानामुत्क्रांतवर्णक्रमधूसराणां ॥ स्तनोत्तरीयाणि भवंति संगान्निर्मोकपट्टाः फणिभि
र्विमुक्ताः ॥ १६ ॥ कालांतरश्यामसुधेषु नक्तमितस्ततो रूढतृणांकुरेषु ॥ त एव मुक्तागुणशुद्धयोऽपि हर्म्येषु भासो
मूर्छंति न चंद्रपादाः ॥ १७ ॥ आवर्ज्य शाखाः सदयं च यासां पुष्पाण्युपात्तानि विलासिनीभिः ॥ वन्यैः पु
लिन्दैरिव वानरैस्ताः क्लिश्यंत उद्यानलता मदीयाः ॥ १८ ॥ रात्रावनाविष्कृतदीपभासः कांतामुखश्रीवियुता
दिवापि ॥ तिरस्क्रियंते कृमितंतुजालैर्विच्छिन्नधूमप्रसरा गवाक्षाः ॥ १९ ॥ वृक्षेशया यष्टिनिवासभंगात्

क्षा

ॐ न्मदंगरागस्फुटपादमादलास्याः ॥ प्राप्ता दवोल्काहतशेषबर्हाः क्रीडामयूरा वनबर्हिणत्वं ॥ २० ॥ बालक्रियावर्जिततीर्थ

रा० वं० सैकतानि स्नानीयसंसर्गविवर्जितानि ॥ उपान्तवानीरगृहाणि दृष्ट्वा शून्यानि निर्म्लायि सरयूजलानि ॥ २१ ॥ तदर्ह

सीमां वसतिं विसृज्य मामभ्युपेतुं कुलराजधानीं ॥ हित्वा तनुं कारणमानुषीं तां यथा गुरुस्ते परमात्ममूर्तिं ॥ २२ ॥

८८ तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत्प्राग्रहरो रघूणां ॥ पूरप्यभिव्यक्तमुखप्रसादा शरीरबंधेन तिरो नागे(?)

४४ बभूव ॥ २३ ॥ तदद्भुतं संसदि रात्रिवृत्तं प्रातर्द्विजेभ्यो नृपतिः शशंस ॥ श्रुत्वा त एनं कुलराजधान्या सा

क्षात्पतित्वे वृतमभ्यनंदन् ॥ २४ ॥ कुशावतीं श्रोत्रियसात्स कृत्वा यात्रानुकूलेऽहनि सावरोधः ॥ अनुद्रुतो वा

युरिवाभ्रवृंदैः सैन्यैरयोध्याभिमुखः प्रतस्थे ॥ २५ ॥ सा केतुमालोपवना बृहद्भिर्विहारशैलानुगतेव ना राम:

गैः ॥ सेना रथोदारगृहा प्रयाणे तस्याभवज्जंगमराजधानी ॥ २६ ॥ तेनातपत्रामलमंडलेन प्रस्था ८८

पितुः पूर्वनिवासभूमिम् ॥ बभौ बलौघः शशिनोदितेन वेलामुदन्वानिव नीयमानः ॥२७॥ तस्य प्रयातस्य वरू
थिनीनां पीडामपर्याप्तवतीव सोढुम् ॥ वसुंधरा विष्णुपदं द्वितीयमध्यारुरोहेव रजश्छलेन ॥२८॥ उद्यच्छमा
ना गमनाय पश्चात्पुरो निवेशे पथि च व्रजंती ॥ सा यत्र सेना ददृशे नृपस्य तत्रैव सामग्र्यमतिं चकार ॥२९॥
तस्य द्विपानां मदवारिसेकात्खुराभिघाताच्च तुरंगमाणाम् ॥ रेणुः प्रपेदे पथि पंकभावं पंकोपि रेणु
त्वमियाय नेतुः ॥३०॥ मार्गैषिणी सा कटकांतरेषु सेना बहुधा विभिन्ना ॥ चकार रेवेव महाविरावा बद्ध
प्रतिश्रुंति गुहामुखानि ॥३१॥ स धातुभेदारुणयाननेमिः प्रभुः प्रयाणध्वनिमिश्रतूर्यः ॥ व्यलंघयद्विंध्य
मुपायनानि पश्यन्पुलिंदैरुपपादितानि ॥३२॥ तीर्थे तदीये गजसेतुबंधात्प्रतीपगामुत्तरतोस्य गंगां ॥
मयत्नबालव्यजनीबभूवुर्हंसा नभोलंघनलोलपक्षाः ॥३३॥ स पूर्वजानां कपिलेन रोषाद्भ

३

रॅं स्नावसेषीकृतविग्रहाणां ।। सुरालयप्राप्तिनिमित्तमंभस्त्रैस्रोतसं नौलुलितं ववंदे ।। ३४ ।। इत्यध्वनः
र० वं० कैश्चिदहोभिरंते कूलं समासाद्य कुशः सरय्वाः ।। वेदिप्रतिष्ठान्विततध्वराणां यूपानपश्यच्छतशो
८९ रघूणां ।। ३५ ।। आधूय शाखाः कुसुमद्रुमाणां स्पृष्ट्वा च शीतान्सरयूतरंगान् ।। तं क्लांतसैन्यं कुल
राजधान्याः प्रत्युजगामोपवनांतवायुः ।। ३६ ।। अथोपशल्ये रिपुमग्नशल्यस्तस्याः पुरः पौरसखः
४९ स राजा ।। कुलध्वजस्तानि चलद्ध्वजानि निवेशयामास बली बलानि ।। ३७ ।। तां शिल्पिसंघाः प्रभु
णा नियुक्तास्तथागतां संभृतसाधनत्वात् ।। पुनर्नवीचक्रुरपां विसर्गान्मेघा निदाघग्लपितामिवो
र्वीम् ।। ३८ ।। ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः ।। उपोषितैर्वास्तुविधानविद्भिर्नि रामः
र्वर्तयामास रघुप्रवीरः ।। ३९ ।। तस्याः स राजोपपदं निशान्तं कामीव कांताहृदयं प्रविश्य ।। य ८९

राजा उपपदं यस्मिन्नृतत्

प्यादिमन्यैरनुजीविलोकं संभावयामास न ताहि तस्तदीये ॥ ४० ॥ तां मंदुरासंश्रयिभिस्तुरंगैः शालाविधिस्तंभ
गतैश्च नागैः ॥ पुरावभासे विपणिस्थपण्यां सर्वांगनद्धाभरणां च नारीं ॥ ४१ ॥ वसन्स तस्यां वसतौ रघूणां
पुराणशोभामधिरोपितायां ॥ न मैथिलेयः स्पृहयांबभूव भर्त्रे दिवो नाप्यलकेश्वराय ॥ ४२ ॥ अथा
स्य रत्नग्रथितोत्तरीयमेकांतपांडुस्तनलंबिहारं ॥ निश्वासहार्यांशुकमाजगाम घर्मः प्रियावेषमिवो
पदेष्टुं ॥ ४३ ॥ अगस्त्यचिह्नादयनात्समीपं दिगुत्तरा भास्वति संनिवृत्ते ॥ आनंदशीतामिव बाष्पवृ
ष्टिं हिमस्रुतिं हैमवतीं ससर्ज ॥ ४४ ॥ प्रवृद्धतापो दिवसोतिमात्रमत्यर्थमेव क्षणदा च तन्वी ॥ उभौ विरो
धक्रियया विभिन्नौ जायापती सानुशयाविवास्तां ॥ दिने दिने शैवलवंत्यधस्तात्सोपानपर्वाणि विमुं
चदंभः ॥ उद्दंडपद्मं गृहदीर्घिकाणां नारीनितंबद्वयसं बभूव ॥ ४६ ॥ वनेषु सायंतनमल्लिकानां विजृंभ

कुं र॰ वं॰ पं॰ णोद्गंधिषु कुड्मलेषु ॥ प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार ॥ ४७ ॥ स्वेदानुविद्धार्द्रनखक्षतां
केष्वपि भूयिष्ठसंदष्टशिखं कपोले ॥ च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात ॥ ४८ ॥ यंत्रप्रवाहैः
शिशिरैः परीतान्रसेन धौतान्मलयोद्भवस्य ॥ शिलाविशेषानधिशय्य निन्युर्धारागृहेष्वातपमृद्धिमंतः ॥ ४९ ॥
स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायंतनमल्लिकेषु ॥ कामो वसंतात्ययमंदवीर्यः केशेषु लेभे बलमंगनानां ॥
५० ॥ आपिंजरा बद्धरजःकणत्वान्मंजर्युदारा शुशुभेऽर्जुनस्य ॥ दग्ध्वापि देहं गिरिशेन रोषात्खंडीकृता ज्येव मनो-
भवस्य ॥ ५१ ॥ मनोज्ञगंधं सहकारभंगं पुराणशीधुं नवपाटलं च ॥ संबध्नता कामिजनेषु दोषाः सर्वे निदा-
घावधिना प्रमृष्टाः ॥ ५२ ॥ जनस्य तस्मिन्समये विगाढे बभूवतुर्द्वौ सविशेषकांतौ ॥ तापापनोदक्षमपा-
दसेवः स चोदयस्थो नृपतिः शशी च ॥ ५३ ॥ अथोर्मिलोलोन्मदराजहंसे रोधोलतापुष्पवहे सरय्वाः ॥ वि- राम
हर्तुमिच्छा वनितासखस्य तस्यांभसि ग्रीष्मसुखे बभूव ॥ ५४ ॥ स तीरभूमौ विहितोपकार्यामानायि ५०

भिक्षामयकच्छनक्रौ ॥ श्रियाहितं श्रीमहिमानमल्पं प्रययक्रमेयक्रधरप्रभावः ॥ ५५ ॥ सातीरसोपानपथावतारादि
न्योन्यकेयूरविघट्टिनीभिः ॥ सनूपुरक्षोभपदाभिरासीदुद्विग्नहंसा सरिदंगनाभिः ॥ ५६ ॥ परस्पराक्षेपपण
नन्यराणां तासां नृपोमज्जनरागदर्शी ॥ नौसंश्रयः पार्श्वगतां किरातीमुपात्तवालव्यजनां बभाषे ॥ ५७ ॥
पश्यावरोधैः शतशोमदीयैर्विगाह्यमानो गलितांगरागैः ॥ संध्योदयः साभ्र इवैष वर्णं पुष्यत्य
नेकं सरयूप्रवाहः ॥ ५८ ॥ विलुप्तमंतःपुरसुंदरीणां यदंजनं नौलुलिताभिरद्भिः ॥ तद्बध्नतीभिर्म सं ब =
दराग्रशोभां विलोचनेषु प्रतिमुक्तमासां ॥ ५९ ॥ एता गुरुश्रोणिपयोधरत्वादात्मानमुद्वोढुमशक्नुवत्यः
गाढांगदैर्बाहुभिरप्सुबालाः क्लेशोत्तरं रागवशात्प्लवंते ॥ ६० ॥ अमी शिरीषप्रसवावतंसाः प्रभ्रंशिनो वारि पारिप्लवाः
विहारिणीनां ॥ पारिप्लवाः स्रोतसि निम्नगायाः शैवाललोलांश्छलयंति मीनान् ॥ ६१ ॥ आसां जलास्फा
प्रभ्रंशिनः

ॐ र. वं. ९७ सर्गे

स्तनस्तनस्यराणां मुक्ताफलस्यूर्द्धिषु सीकरेषु ॥ पयोधरोत्सर्पिषु शी र्यमाणाः संलक्ष्यमाणे नच्छिद्रेष्वपि हार ॥ ६२ ॥
स्यावर्त्तशोभानतनाभिकांते र्भंगाध्रुवां द्वंद्ववराः स्तनानां ॥ जातानि रूपावयवोपमानान्यदूरवर्त्तीनि विलासि
नीनां ॥ ६३ ॥ तीरस्थलीबर्हिभिरुत्कलापैः प्रस्निग्धकेकैरभिनंद्यमानं ॥ श्रोत्रेषु संमूर्छति रक्तमासां गी
तानुगं वारिमृदंगवाद्यं ॥ ६४ ॥ संदष्टवस्त्रेष्ववलानितंबेष्विंदुप्रकाशांतरितोडुकल्पाः ॥ अमीजलापूरित
सूत्रमार्गा मौनं भजंते रसनाकलापाः ॥ ६५ ॥ एताः करोत्पीडितवारिधारा मार्त्तसखीभिर्वदनेषु सिक्ताः ॥ वक्रे परिचिच्छमानाः
तराग्रैरलकैस्तरुण्यश्चूर्णारुणान्वारिलवान्वमंति ॥ ६६ ॥ उद्बंधकेशश्च्युतपत्रलेखो विश्लेषिमुक्ताफल
जालशोभः ॥ मनोजस्य वश्यमदामुखानां मंभोविहाराकुलितोपि वेषः ॥ ६७ ॥ स नौ विमानादवतीर्य
रेमे विलोलमालः सहताभिरप्सु ॥ स्कंधावलग्नोद्धृतपद्मिनीकः करेणुभिर्वन्य इव द्विपेंद्रः ॥ ६८ ॥ रामः
ततो नृपेणानुगताः स्त्रियस्ता भ्राजिष्णुनासातिशयं विरेजुः ॥ प्रागेव मुक्ता नयनाभिरामाः प्राप्येंद्र ९९

९।

नीतं किमुतोन्मयूखं ॥ ६९ ॥ वर्णोदकैः कांचनशृंगरासिस्यैस्तमायताक्षाः प्रणयादसिंचन् ॥ तथागतः सोऽति
तरां बभासे सधातुनिष्यंद इवाद्रिराजः ॥ ७० ॥ तेनावरोधप्रमदासखेन विगाहमानेन सरिद्वरां तां ॥ आका
शगंगारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः ॥ ७१ ॥ यत्कुंभयोनेरधिगम्य रामः कुशाय राज्येन
समं दिदेश ॥ तदस्य जैत्राभरणं विहर्तुरज्ञातपातं सलिले ममज्ज ॥ ७२ ॥ स्नात्वा यथाकामममसौ सदार
स्तीरोपकार्यां गतमात्र एव ॥ दिव्येन शून्यं वलयेन बाहुमुपोढनेपथ्यविधिर्ददर्श ॥ ७३ ॥ जयश्रियः
संवननं यतस्तदामुक्तपूर्वं गुरुणा च यस्मात् ॥ सेहेस्य न भ्रंशमतो न लोभात्स तुल्यपुष्पाभरणो हि वी धी
रः ॥ ७४ ॥ ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान् ॥ वंध्यश्रमास्ते सरयूं विगा
ह्य तमूचुरम्लानमुखप्रसादं ॥ ७५ ॥ कृतः प्रयत्नो न च देव लब्धं मग्नं पयस्याभरणोत्तमं ते ॥ नागेन
लौल्यात्कुमुदेन नूनमुपात्तमंतर्ह्रदवासिना तत् ॥ ७६ ॥ ततः स कृत्वा धनुराततज्यं धनुर्द्धरः को

ग्रपवात्मत्तरस्यर्चिगन्नोलीनत्तगादितेतिवैजयन्नीः।

सं दृ

ॐ पवित्सेमिहितासः॥ततःसतंततीरगतस्तरस्वीभुजंगनाशायसमाददेस्त्रं॥ ७७ ॥तस्मिन्ह्रदःसंहितमात्रएवक्षोभात्स
माविद्धतरंगहस्तः॥रोधांसिभिंदन्नवपातमग्नःकरीवमत्तःपरुषंरराम॥ ७८ ॥तस्मात्समुद्रादिवमथ्यमानादु
र.वं. द्वृत्तनक्रात्सहसोन्ममज्ज॥लक्ष्म्येवसार्द्धंसुरराजवृक्षःकन्यांपुरस्कृत्यभुजंगराजः॥ ७९ ॥विभूषणप्र
९२ त्युपहारहस्तमुपस्थितंवीक्ष्यविशांपतिस्तं॥सौपर्णमस्त्रंप्रतिसंजहारप्रह्वेष्वनिर्बंधरुषोहिसंतः॥ ८० ॥
92 त्रैलोक्यनाथप्रभवंप्रभावात्कुशंद्विषामंकुशमस्त्रविद्वान्॥मानोन्नतेनाप्यभिवंद्यमूर्ध्नामूर्धाभिषिक्तं
कुमुदोबभाषे॥ ८१ ॥अवैमिकार्यांतरमानुषस्यविष्णोःसुताख्यामपरांतनुंत्वां॥सोहंकथंनामतवाचरे
यमाराधनीयस्यधृतेर्विघातं॥ ८२ ॥कराभिघातोत्थितकंदुकेयमालोक्यबालातिकुतूहलेन॥ह्रदात्प जवा
त तज्ज्योतिरिवांतरिक्षादादत्तजैत्राभरणंत्वदीयं॥ ८३ ॥तदेतदाजानुविलंबितेनज्याघातलेखास्थिर रामः
लांछनेन॥भुजेनरक्षापरिघेणभूमेरुपैतुयोगंपुनरंसलेन॥ ८४ ॥इमांस्वसारंचयवीयसींमेकु ९२

।क्षार्थंपरित्रायमानेन

श्री गीकर्ण
अग्रे मन्त्रं नाहं लभितं नः।

मद्वतीनाहसितेनानुमेतुं ॥ आत्मापराधं नुदतीं चिराय शुश्रूषया पार्थिवपादयोस्तं ॥ ८४ ॥ इत्युचिवानु
पहृताभरणः क्षितीशं श्लाघ्यो भवान्स्वजन इत्यभिभाषितारं ॥ संयोजयां विधिवदास समेतबंधुः
कन्यामयेन कुमुदः कुलभूषणेन ॥ ८५ ॥ तस्याः स्पृष्टे मनुजपतिना साहचर्याय हस्ते मांगल्योर्णावल
यिनि पुरः पावकस्योच्छिखस्य ॥ दिव्यस्तूर्यध्वनिरुदचरद्व्यश्नुवानो दिगंतान्गंधोदग्रं तदनु ववृषुः पु
ष्पमाश्चर्यमेघाः ॥ ८६ ॥ इत्थं नागस्त्रिभुवनगुरोरौरसं मैथिलेयं लब्ध्वा बंधुं तमपि च कुशः पंचमं तक्षक
स्य ॥ एकः शंकां पितृवधरिपोरत्यजद्वैनतेयाच्छांतव्यालामवनिमपरः पौरकांतः शशास ॥ ८७ ॥ इति
श्रीरघुवंशे महाकाव्ये कालिदासकृतौ कुमुद्वतीविवाहो नाम षोडशः सर्गः ॥ १६ ॥ अतिथिं नाम का
कुत्स्थात्पुत्रमाप कुमुद्वती ॥ पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ १ ॥ स पितुः पितृमान्वंशं
मातुश्चानुपमद्युतिः ॥ अपुनात्सवितेवोभौ मार्गावुत्तरदक्षिणौ ॥ २ ॥ तमादौ कुलविद्यानामर्थ

विद्विज

कुमुद्वती भूमध्यगाव
त्रैमन्त्रो मेषादितो
मध्वित्रियादवः =

गो। सो धर्मपत्नी।
जरन्ति यादवः =

ऊं र.वं. स१७ ९३

मर्थविदां वर ॥ पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पिता ॥ ३ ॥ जात्यस्तेनाभिजातेन शूरः शौर्यवता कु
शः ॥ अमन्यतैकमात्मानमनेकं वशिना वशी ॥ ४ ॥ स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् ॥ जघान स न
मरे दैत्यं दुर्जयं तेन चावधि ॥ ५ ॥ तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ॥ अन्वगात्कुमुदानन्दं शशाङ्कमि
व कौमुदी ॥ ६ ॥ तयोर्दिवस्पतेरासीदेकः सिंहासनार्द्धभाक् ॥ द्वितीयापि सखी शच्याः पारिजातांशभा
गिनी ॥ ७ ॥ तदात्मसंभवं राज्ये मन्त्रिवृद्धाः समादधुः ॥ स्मरन्तः पश्चिमामाज्ञां भर्तुः संग्रामयायिनः ॥ ८
ते तस्य कल्पयामासुरभिषेकाय शिल्पिभिः ॥ विमानं नवमुद्वेदि चतुःस्तम्भप्रतिष्ठितं ॥ ९ ॥ तत्रैनं हेम अभिषेकमण्डपे
कुम्भेषु संभृतैस्तीर्थवारिभिः ॥ उपतस्थुः प्रकृतयो भद्रपीठोपवेशितं ॥ १० ॥ नदद्भिः स्निग्धगम्भीरं तू
र्यैराहतपुष्करैः ॥ अन्वमीयत कल्याणं तस्याविच्छिन्नसंततेः ॥ ११ ॥ दूर्वायवाङ्कुरप्लक्षत्वगभिन्नपुटोत्तरा रामः स१७
न् ॥ ज्ञातिवृद्धैः प्रयुक्तान्स भेजे नीराजनाविधीन् ॥ १२ ॥ पुरोहितपुरोगास्तं जिष्णुं जैत्रैरथर्वभिः ॥ उपच

उत्करंकरितस्ताः जले वा [illegible] दिव्याधिधारायां तीर्थमेव [illegible] त्रिपोजयश्री- दूर्वा च यवाङ्कुरश्च प्लक्षत्वक् [illegible]
[illegible] अभिन्नपुटः [illegible] मङ्गलद्रव्यम् [illegible]

नि

क्रमिरे पूर्वमभिषेकं द्विजातयः ॥१३॥ तस्यौघमहती मूर्ध्नि निपतंती व्यरोचत ॥ सशब्दमभिषेकश्रीर्गंगेव त्रिपुरद्विषः ॥ १४
स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वंदिभिः ॥ प्रवृद्ध इव पर्जन्यः सारंगैरभिनंदितः ॥१५॥ तस्य सन्मंत्रपूताभिः स्नान
मद्भिः प्रतीछतः ॥ ववृधे वैद्युतस्याग्नेर्वृष्टिसेकादिव द्युतिः ॥१६॥ स तावदभिषेकांते स्नातकेभ्यो ददौ वसु ॥ याव
त्तेषां समाप्येरन्यज्ञाः पर्याप्तदक्षिणाः ॥ ते प्रीतमनसस्तस्मै यामाशिषमुदैरयन् ॥ सा तस्य कर्मनिर्वृत्तैर्दूरं प
श्चात्कृता फलैः ॥१८॥ बंधछेदं स बद्धानां वधार्हाणामवध्यतां ॥ धुर्याणां च धुरो मोक्षमदोहं चादिशद्गवां
॥१९॥ क्रीडापतत्रिणोप्यस्य पंजरस्थाः शुकादयः ॥ लब्धमोक्षास्तदादेशाद्यथेष्टगतयोऽभवन् ॥२०॥ ततः क
क्षांतरन्यस्तं गजदंतासनं शुचि ॥ सोत्तरछदमध्यास्त नेपथ्यग्रहणाय सः ॥२१॥ तं धूपाश्यानकेशांतं तोयनिर्णि
क्तपाणयः ॥ आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥२२॥ तेस्य मुक्तागुणोन्नद्धं मौलिमंतर्गतस्रजं ॥ प्र

ध्रुवपूर्वीजनंगाने
मौलिंप्रसङ्गस्योजयर

तिलकं

त्पूपुपङ्गरागेण प्रभामंडलवर्द्धिना ॥ २३ ॥ चंदनेनांगरागोयं मृगनाभिसुगंधिना । समापय्य ततश्चक्रुः पत्रं विन्यस्त

ॐ रोचनं ॥ २४ ॥ आमुक्ताभरणः स्रग्वी हंसचिह्नदुकूलवत् । आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥ २५ ॥ नेपथ्य

१०.वं दर्शिनश्छाया तस्यादर्शे हिरण्मये । विरराजोदिते सूर्ये मेरौ कल्पतरोरिव ॥ २६ ॥ स राजककुदव्यग्रपाणिभिः पार्श्व

वर्त्तिभिः ॥ ययावुदीरितालोकः सुधर्मानवमां सभां ॥ वितानसहितं तत्र भेजे पैतृकमासनं । चूडामणिभिरुद्घृ

ष्टपादपीठं महीक्षितां ॥ २८ ॥ बभौ भूयः कुमारत्वादधिराज्यमवाप्य सः । रेखाभावादुपारूढः सामग्र्यमिव चं

य॰ द्रमाः ॥ २९ ॥ शुशुभे तेन चाक्रान्तं मंगलायतनं महत् । श्रीवत्सलांछनं वक्षः कौस्तुभेनेव केशवम् ॥ ३० ॥

प्रसन्नमुखरागं तं स्मितपूर्वाभिभाषिणं । मूर्त्तिमन्तममन्यन्त विश्वासमनुजीविनः ॥ ३१ ॥ स पुरं पुरुहूतश्रीः

कल्पद्रुमनिभध्वजां । क्रममाणश्चकार द्यां नागेनैरावतौजसा ॥ ३२ ॥ तस्यैकस्योच्छ्रितं छत्रं मूर्द्धि तेनामल

मेघकेन
दीप्तिनो वि १८४
द्वितीयजनीवादि
शब्दोयम ९५

विन्यस्ता गोरो
चनायत्र

तिथि:

२०६

ग्राम
१८४

श्रीवत्सो हि . . . लक्ष्मी प्रतिमा चिह्नं . . . श्रीवत्सो . . . सभायाः सन्निवेशविशेष . . .
सलिलः . . . श्रीवत्स . . .

पुरस्पदत्तिलं कुर्वन् = कोशाद ... नेन ... पादक ... नाधिकारित ... निराकरणं ... करत्पदरे =

सविषा ॥ पूर्वराजवियोगोत्थं शोकं कृत्वा स्वयं जगतीं हतं ॥ ३३ ॥ धर्मादप्रेरिता यस्माद्दृष्टयादशवीवरवै ॥ सोऽनीत्यं तेजसा
वन्निसममेवोत्थितो गुणैः ॥ ३४ ॥ तं प्रीतिविशदैर्नेत्रैरन्वयुः पौरयोषितः ॥ शरत्प्रसन्नैर्ज्योतिभिर्विभावर्य इव ध्रु ध्रुवम्
प ॥ ३५ ॥ अयोध्यादेवताश्चैनं प्रशस्तायतनार्चिताः ॥ अनुदध्युरनुध्येयं सान्निध्यैः प्रतिमागतैः ॥ ३६ ॥ यावन्ना
श्यायते वेदिराभिषेकजलाप्लुता ॥ तावदेवास्य वेलान्तं प्रतापः प्रापदुःसहः ॥ ३७ ॥ वसिष्ठस्य गुरोर्मन्त्राः सा
यकास्तस्य धन्विनः ॥ किं न साध्यं यदुभये साधयेयुर्न संगताः ॥ ३८ ॥ स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां
स्वयं ॥ ददर्श संशयच्छेद्यान्व्यवहारानतन्द्रितः ॥ ३९ ॥ ततः परमभिव्यक्तसौमनस्यनिवेदितैः ॥ युयोज पाका
भिमुखैर्भृत्यान्विज्ञापनाफलैः ॥ ४० ॥ प्रजास्तद्गुरुणा नद्यो नभसेव विवर्धिताः ॥ तस्मिंस्तु भूयसीं वृद्धिं नभ
स्ये ता इवाययुः ॥ ४१ ॥ यदुवाच न तन्मिथ्या यद्ददौ न जहार तत् ॥ सोऽभूद्भग्नव्रतः शत्रूनुद्धृत्य प्रतिरोपयन्
॥ ४२ ॥ वयोरूपविभूतीनामेकैकं मदकारणं ॥ तानि तस्मिन्समस्तानि न तस्योत्सिषिचे मनः ॥ ४३ ॥ इत्थं ज

मदकारणानि

निनरागास्सुप्रकृतिष्वनुवासरं ॥ अक्षोभ्यः स नवोप्यासीद्दृढमूल इव द्रुमः ॥ ४४ ॥ अनित्याः शत्रवो बाह्या विप
कृष्टाश्च ते यतः ॥ अतः सोभ्यन्तरान्नित्यान्षट् पूर्वमजयद्रिपून् ॥ ४५ ॥ प्रसादाभिमुखे तस्मिंश्चपलापि स्वभा
वतः ॥ निकषे हेमलेखेव श्रीरासीदनपायिनी ॥ ४६ ॥ कातर्य्यं केवला नीतिः शौर्यं श्वापदचेष्टितं ॥ अतः
सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥ ४७ ॥ न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ॥ अदृष्टम
भवत्किंचिद्व्यभ्रस्येव विवस्वतः ॥ ४८ ॥ रात्रिंदिवविभागेषु यदादिष्टं महीक्षितां ॥ तत्सिषेवे नियोगेन स
विकल्पपराङ्मुखः ॥ ४९ ॥ मंत्रः प्रतिदिनं तस्य बभूव सह मंत्रिभिः ॥ स जातु सेव्यमानोपि गुप्तद्वारो न सूच्यते ॥
परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः ॥ सोपसर्पैर्जजागार यथाकालं स्वपन्नपि ॥ ५० ॥ भैव्यमुखाः समारंभाः
प्रत्यवेक्षा निरत्ययाः ॥ गर्भशालिसधर्म्माणस्तस्य गूढं विपेचिरे ॥ ५१ ॥ अपथेन प्रववृते न जातूपचितो
पि सः ॥ वृद्धौ नदीमुखेनैव प्रस्थानं लवणाम्भसः ॥ ५२ ॥ दुर्गाणि दुर्ग्रहाण्यासंस्तस्य रोद्धुरपि द्विषां ॥ न हि

ॐ
र. वं.
१५५

किं वरव भावादु कम निवातेन्हु ः=

अरसेतं तेन सेव चन्तपापेश्च क्रमागतम् रहितं
वसते भयापि तेन तेषं च तत् दिधितिकामः कः

प्रमानमनतुरागदेतोरपरपस्पापनीकारः कतै च्चहंमन्यते
कत्तदपहितस्य प्रकृतीनां जये क्षोदविरागकारकोत्पादये
दितिकोविलः

सिंहो राजा स कदाचिद्भयाद्गिरिगुहाशयः ॥ ५४ ॥ कामं एकानि वैरायं स तत्स्वः शमयितुं समः ॥ यस्य कार्यैः प्रतीकारः

स तेनैवोपपादयेत् ॥ ५५ ॥ शाक्यो वै वो भवत्यात्मा तस्य प्राज्ञैर्मतः सतः ॥ समीरणसहायोऽपि नोऽग्निः प्रदीपवान्

स्तः ॥ ५६ ॥ न धर्ममर्थकामाभ्यां बाधेत नृप तेन तौ ॥ नार्थकामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ॥ ५७ ॥ हीना

न्यनुपकर्तॄणि प्रवृद्धानि विकुर्वते ॥ तेन मध्यमभावेन मित्राण्यस्थापितान्यतः ॥ ५८ ॥ परात्मनोः परि

च्छिद्य शक्त्यादीनां बलाबलम् ॥ ययावैरीन्विपि स्वस्थस्य परस्मात्तदा सोऽन्यथा ॥ ५९ ॥ कोशादोम्यर्याणि य

त्वमिति तस्यार्थसंग्रहः ॥ अनुरागो हि जीमूतस्थानकैरभिनन्द्यते ॥ ६१ ॥ परकर्मापहः सोऽभूदुद्यतः स्व

षु कर्मसु ॥ आवर्णोद्यमनेषु धुरंधरेषु प्राहुर्द्विषां ॥ ६२ ॥ सर्पस्येवांस पित्रा संवर्द्धितोऽपि नित्यं कृतागसः ॥ सो

पराधिकः ॥ तस्य दण्डे वतो दण्डः स्वदेहान्तर्व्यापिशिष्यते ॥ ६३ ॥ सर्पस्येव शिरोरत्नं नास्य शक्तित्रयं परः ॥

अपि कवलेदुर्जय
सनेतु सन्देहापलह
न्याय
प्रधुनाताति कृतं
तानिं परिहरेत्

उप्रकरतेः अज्ञापी
निवचनात्साधुः=२
कृतं शिक्षितमस्य
येत

हेतोः न लोभात्

दुर्गसेतुवणिक्पथ
सन्निवेशाकरद्रव्यगज
कर्मान्तबलनः प्रवर्तेत
तु परस्य चेतानुपद्रवं तु
जायतेनेति कोविल्यः=२

सन्तनये रक्षेत जीवति

युक्त आडवतो यवावत ततः= दण्डो मौलं बलं कुलं कमादागतम् पित्रा संवर्द्धिताकृता
त्वात्तापरायिकादिति तुल्यताः=

ॐ
र० थं०
९६

सद्यकर्षपरस्मान्नदय स्कांत इवायसं ॥ ६४ ॥ वापीषु वस्त्रवंतीषु वनेषूपवनेषु च ॥ सार्धं स्वैरं तदीयेषु चेरुर्वेश्म
स्विवाद्रिषु ॥ ६५ ॥ तयोरसंसविग्रेभ्यस्तकरेभ्यश्च संपदः ॥ यथा स्वमाभ्रमेभ्यश्च केवलैर्विवषड्गुभाकू ॥ ६६ ॥
रवनिभिः सुषुवेरत्नं देवैः सस्यं वनैर्गजान् ॥ दिदेशावेदितं न स्मेरस्ता मद्दशमैवं भ्रं ॥ ६७ ॥ संगुणानां वल्ला
नांवषसंश्चषरामुखविक्रमः ॥ बभूव विनियोगः सः साधनीयेषु वस्तुषु ॥ ६८ ॥ इतिक्रमात्स्वयं ज्ञातो दूर्ती पि
चतुर्विधां ॥ ख्याती प्राप्य नीयात सततस्याः फल मानसे ॥ ६९ ॥ कूटयुद्धविधिज्ञो पि तस्मिन्संमारायाधिलि
भेजेभिसारिकाच्छिन्नं जयश्रीर्वीरकामिनी ॥ ७० ॥ संतस्तस्याभिरामनादत्यर्थं महतः स्पृहाः ॥ उद्ययैर्दिवजी
मता पुर्दातृत्वमर्थिनः ॥ ७१ ॥ स्तूयमानः स जिह्मायस्तु तमेवं समाचरत् ॥ तथापि पश्यन्तस्य तस्य नीरको
रिविद्वेषो लोपमूः ॥ ७२ ॥ दृष्टि तं दर्शनेनं प्रसन्नस्त त्वार्थिनं न दत्तम ॥ प्रज्ञां सरजेयां यथके शा स्वान्त्यर्यहवो
दितः ॥ ७३ ॥ इंदोर्देशनयः पद्मस्तुर्यस्य कुमुदे शाव ॥ गुणास्तस्य विपक्षे पि गुणिनो लेभिरे तरां ॥ ७४ ॥

९६

इन्द्राद्वृष्टिरित्यन्वयः ... विनम्य ... इति ... (interlinear gloss, top margin)

मर्त्यो देवतो ... ... कालवेद

पराभिसंधानपरं यद्यप्यस्य विचेष्टितं॥ जिगीषोरश्वमेधाय धर्म्यमेव बभूव तत्॥ ७४॥ एवमुद्यन्प्रभावेण शास्त्रनि
र्दिष्टवर्त्मना॥ वृषेव देवो देवानां राज्ञां राजा बभूव सः॥ ७६॥ पंचमं लोकपालानामूचुः साधर्म्ययोगतः॥ भूतानां
महतां षष्ठमष्टमं कुलभूभृतां॥ ७७॥ दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पितां॥ दधुः शिरोभिर्भूपाला दे
वाः पौरंदरीमिव॥ ७८॥ ऋत्विजः स तथानर्च दक्षिणाभिर्महाक्रतौ॥ यथा साधारणीभूतं नामास्य धनद
स्य च॥ ७९॥ इन्द्राद्वृष्टिर्नियमितगदोद्रेकवृत्तिर्यमोऽभूद्यादोनाथः शिवजलपथः कर्मणे नौचराणां॥ पूर्वा
पेक्षी तदनुविदधे कोशवृद्धिं कुबेरस्तस्मिन्दण्डोपनतचरितं भेजिरे लोकपालाः॥ ८०॥ इति श्री रघुवंशे महाका
व्ये कालिदासकृतौ प्रकृतिरंजनो नाम सप्तदशः सर्गः॥ १७॥ स नैषधस्यार्थपतेः सुतायामुत्पादयामास
निषिद्धशत्रुः॥ अनूनसारं निषधान्नगेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव॥ १॥ तेनोरुवीर्येण पिता प्रजायै कल्पि
ष्यमाणेन ननन्द यूना॥ सुवृष्टियोगादिव जीवलोकः सस्येन संपत्तिफलात्मकेन॥ २॥ शब्दादि निर्विश्य सुख

इन्द्राद्वृष्टिर्लोकवल्लवत्सेवी ... किलादिभिः वह्नेर्दण्डोपनीतो ... इति कोटेश्वरः ४

(left margin gloss) परस्य शत्रोरभिसंधानं ... तत्र यत्परायणं ... धर्मादनपेतं धर्म्यम् ...

(right margin glosses) पृथ्वीपालत्वे ... निर्विघ्नः ... हवीर्येण ... भुक्त्वा ...

निषध्याते = २

स्वं निषेधे कुमुद्वत्याः अपत्यमतिथिः

ॐ सुतं निरायम्य तस्मिन्प्रतिष्ठापितराजभावः ॥ कौमुद्वतेयः कुमुदावदातैर्द्यामर्जितां कर्मभिराऽरोह ॥३॥ पौत्रः कुश

र॰ वं॰ स्यापि कुशेशयाक्षः ससागरां सागरधीरचेता ॥ एकातपत्रां भुवमेकवीरः पुरार्गलादीर्घभुजो बुभोज ॥४॥ तस

९७ स्यानलौजास्तनयस्तदन्ते वंशश्रियं प्रापनलाभिधानः ॥ यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभ

वक्त्रः ॥५॥ नभश्चरैर्गीतयशाः स लेभे नभस्तलश्यामतनुं तनूजं ॥ ख्यातं नभःशब्दमयेन नाम्ना कांतं नभोमास

मिव प्रजानां ॥६॥ तस्मै विसृज्योत्तरकोशलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वं ॥ मृगैरजर्यं जरसोपदिष्टमदेहबंधा

य पुनर्बबंध ॥७॥ तेन द्विपानामिव पुण्डरीको राज्ञामजय्योजनि पुण्डरीकः ॥ शान्ते पितर्याहृतपुण्डरीका यं पुण्डरी

काक्षमिव श्रिता श्रीः ॥८॥ स क्षेमधन्वानममोघधन्वा पुत्रं प्रजाक्षेमविधानदक्षं ॥ क्ष्मां प्रापयित्वा क्षम

योपपन्नं वने तपः क्षान्ततरश्चचार ॥९॥ अनीकिनीनां समरेग्रयायी तस्यापि देवप्रतिमः सुतोभूत् ॥ व्यश्रू रामः

यतानीकपदावसानं देवादिनाम त्रिदिवेपि यस्य ॥१०॥ पिता समाराधनतत्परेण पुत्रेण पुत्री स यथैव तेन ९७

तस्य नभसः प्रभवे उत्पत्तिस्थाने नलः

श्रुतीकपदमवसानं यस्य देवपदं मादौ यस्य तन्नाम देवानीक इति =

प्रियवादित्वात्-

पुत्रस्तथैवाधिकवत्सलेन स तेन पित्रा पितृमान्बभूव ॥११॥ सर्वस्य योगात्मसमे धियि रोचमाने तमोऽन्वेवर्णयनुस्य यस्य ॥ यु
रं निधायैकनिधिर्गुणानां जगाम खलु व्याधविमायेन लोकम् ॥१२॥ वशी सुतस्तस्य वशंवदत्वात्स्वेच्छामिवासीद्द्विषतां मयि
ष्टः ॥ सकृद्विविग्नानपि यत्र युक्तं माधुर्यमीष्टे हरिणान्ग्रहीतुम् ॥१३॥ रमहीनगुर्नाम महीसमाग्रा महीनवाहुद्रविणः
शशास ॥ यो हीनसंसर्गपराङ्मुखत्वाद्युवाप्यनर्थव्यसनैर्विहीनः ॥१४॥ गुरोः सवर्णान्तरमंतरज्ञः पुंसां पुमानाद्य
इवावतीर्णः ॥ उपक्रमैरस्खलितैश्चतुर्भिश्चतुर्दिगीशाश्चतुरो बभूव ॥१५॥ तस्मिन्प्रयाते परलोकयात्रां
रि जेतर्यरीणां तनयं तदीयम् ॥ उच्चैःशिरस्त्वाज्जितपारियात्रं लक्ष्मीः सिषेवे किल पारियात्रम् ॥१६॥ तस्याभवत्
सूनुरुदारशीलः शिलः शिलापट्टविशालवक्षाः ॥ जितारिपक्षोऽपि शिलीमुखैर्यः शालीनतामव्रजदीड्यमा
नः ॥१७॥ तमात्मजन्मानमनिन्दितात्मा कृत्वा युवानं युवराजमेव ॥ सुखानि सोऽभुंक्त सुखोपरोधि वृत्तं हि राज्ञामु
परुद्धवृत्तम् ॥१८॥ तं रागबंधिष्ववितृप्तमेव भोगेषु सौभाग्यविशेषभोग्यम् ॥ विलासिनीनामरतिक्षमत्वाज्जरा

उपरुद्धत्वमिवास्त तन्त्रचेष्टितमिव हस्तव नेनयत्र

परोपकृतिस्त्रकार्ययोः कर्माण्यपरमनेत्वयम् सोपरुद्धरतिर्व्यात्तराज्ञानस्व रवभाग्यवेदिति-

भी

सुखविघ्नकरं राजकार्यमयुक्तत्वाद्नवकाशात्तु =

प्रचार्थवल्लभ ... नतंतिनिरो नाभिरन्ध्रो यस्य सः

ॐ यां मत्तसारिणीजनार्हां ॥ १९ ॥ अन्वाभजत्पृथुकृतनामधेयं तस्यां यथार्थोऽभवत्तनाभिरंध्रः ॥ आसीत्सुतः पंकजना

भस्तस्य यः कृत्स्नस्य नाभिर्नृपमंडलस्य ॥ २० ॥ ततः परं वज्रधरप्रभावस्तदात्मजः संयति वज्रघोषः ॥ बभूव वज्रार्क

र॰ थं॰ रभूषणाग्र्यः पतिः पृथिव्याः किल वज्रनाभः ॥ २१ ॥ तस्मिन्जाते यां सुकलो परत्र शूरं ततस्तं भुवं खंडनमण्डिवान्ता ॥ उ

६८ त्थवानपात्रं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ॥ २२ ॥ तस्यावसाने हरिदश्वधामापि त्वंशुपदे पदमश्वरू

पः ॥ वेलातटे घुषितसैनिकाश्वं पुराविदो यं व्युषिताश्वमाहुः ॥ २३ ॥ आराध्य विश्वेश्वरमीश्वरेण तेन द्वि

सर्वत्र तुल्य इति: तेर्विश्वसहो धिजज्ञे ॥ पातुं सहो विश्वसहः समग्रां विश्वंभरामात्मजमेव रीतिरात्मा ॥ २४ ॥ अंशो हिरण्यास

विश्वसहः रिपोः स जाते हिरण्यनाभे तनयेन यन्तुः ॥ द्विपसमहः सुतरां न लण्यां कैरण्यरेतानिव सानिलोभ्मता ॥ २५ ॥

हिरण्यनाभं पितापितॄणामनृणोऽस्तमन्त्यं यस्यांनतानि स्वरवानिलिप्सुः ॥ राजानमाजानुविलंबिबाहुः कृत्वा कृती

वल्कलवानभूव ॥ २६ ॥ कौशल्य इत्युत्तरकोशलानां पत्युः पतंगान्वयभूषणस्य ॥ तस्यौरसः सो

कौशल्य इति नाम सः

ब्रह्मसभाम् पर्यंतम् प्रतिप्रसिद्धः
प्रकाशो... सिद्धैः...

सोमं सुनोति यज्वा

आब्रह्मसभं ब्रह्म
ब्रह्मिष्ठमेव स्वतनया
विपीडमुपद्रवरहितं
प्रसिद्धां शासनांकां
प्रजेशे... जनाः
अलंकृताः

मसुतः सुतोभून्नेत्रोत्सवः सोम इव द्वितीयः ॥२७॥ यशोभिराब्रह्मसभं प्रकाशः स ब्रह्मभूयं गतिमाजगाम ।
ब्रह्मिष्ठमाधाय निजेधिकारे ब्रह्मिष्ठमेव स्वतनुप्रसूतम् ॥२८॥ तस्मिन्कुलापीडनिभे विपीडं सम्यग्महीं शा
सति शासनांकां ॥ प्रजाश्चिरं सुप्रजसि प्रजेशे ननंदुरानंदजलाविलाक्ष्यः ॥२९॥ पात्रीकृतात्मा गुरुसेवनेन
स्पष्टाकृतिः पत्ररथेन्द्रकेतोः ॥ तं पुत्रिणां पुष्करपत्रनेत्रः पुत्रः समारोपयदग्रसंख्यां ॥३०॥ वंशस्थितिं
वंशकरेण तेन संभाव्य भावी स सखा मघोनः ॥ उपस्पृशन्स्पर्शनिवृत्तलौल्यस्त्रिपुष्करेषु त्रिद
शत्वमाप ॥३१॥ तस्य प्रभानिर्जितपुष्परागं पौष्यां तिथौ पुष्यमसूत पत्नी ॥ यस्मिन्नपुष्यन्नुदिते
समग्रां पुष्टिं जनाः पुष्य इव द्वितीये ॥३२॥ महीं महेच्छः परिकीर्य सूनौ मनीषिणे जैमिनयेर्पितात्मा
॥ तस्मात्सयोगादधिगम्य योगमजन्मनेकल्पत जन्मभीरुः ॥३३॥ ततः परं तत्प्रभवः प्रपे

पालयति

पुष्करपत्रे

पुष्पः पद्मरागः
नक्षत्रे पुष्ये
अपि द्वादशनेत्रे च
सर्वार्थसाधकः

शिष्यो...

अपुनर्भूयो गमहिताय

ॐ
र. वं.
९८
११

देध्रुवोपमेये ध्रुवसंधिरुर्वी॥ तस्मिन्नभ्युपायमिसत्यसंधे संधिर्ध्रुवः सन्नमतोन्नयाणां॥ ३४॥ सुतेशिशावेव
सुदर्शनाख्ये दर्शात्ययेंदु प्रियदर्शने सः। मृगायताक्षो मृगयाविहारी सिंहादवापद्विपदं नृसिंहः॥ ३५॥ स्वर्गा
मिनस्तस्य तमैकमत्यादमात्यवर्गः कुलतंतुमेकं॥ अनाथदीनाः प्रकृतीरवेक्ष्य साकेतनाथं विधिवच्चकार॥ ३६॥ नवें
दुना तन्नभसोपमेयं शावैकसिंहेन च काननेन। रघोः कुलं कुड्मलपुष्करेण तोयेन चाप्रौढनरेंद्रमासीत्॥ ३७॥ लोकेन
भावी पितुरेव तुल्यः संभावितो मौलिपरिग्रहात्सः। दृष्टो हि वृण्वन्कलभप्रमाणोप्याशाः पुरोवातमवाप्य मेघः॥ ३८॥
तं राजवीथ्यामधिहस्ति यांतमाधोरणालंबितमग्र्यवेषं॥ षड्वर्षदेशीयमपि प्रभुत्वात्प्रैक्षंत पौराः पितृगौर
वेण॥ ३९॥ कामं न सोकल्पत पैतृकस्य सिंहासनस्य प्रतिपूरणाय॥ तेजोमहिम्ना पुनरावृतात्मा तद्व्याप चामीक
रपिंजरेण॥ ४०॥ तस्मादधः किंचिदिवावतीर्णावसंस्पृशंतौ तपनीयपीठं॥ सालक्तकौ भूपतयः प्रसिद्धैर्ववंदि
रे मौलिभिरस्य पादौ॥ ४१॥ मणौ महानील इति प्रभावादल्पप्रमाणेपि यथा न मिथ्या॥ शब्दो महाराज इति प्र

इतिनाकामनुम
तितलयंत्र
प्रातिपादकाद्रात
येचकालेलिव
मुकुटैः

तिनकनं
रामः
ललिते

युक्तं तथैव तस्मिन्नुयुवर्ने भकेपि ॥ ४३ ॥ पर्यन्तसंचारितचामरस्य कपोललोलोभयकाकपक्षात् ॥ तस्याननादुच्चरि

नखवलितः = तोनिर्दैश्याम[illegible]कवैलास्यपिनाणिवानां ॥ ४४ ॥ निर्वृत्तजांबूनदपट्टबंधे न्यस्तं ललाटे तिलकं दधानः ॥ [illegible]

तिलकेन [illegible] तेनैव शून्यान्यरिसुंदरीणां मुखानि स स्मेरमुखश्चकार ॥ ४४ ॥ शिरीषपुष्पाधिकसौकुमार्यः खेदं स यायाद्

दपि भूषणेन ॥ नितान्तगुर्वीमपि सं प्रभावाद् धुरं धरित्र्या बिभरांबकार ॥ ४५ ॥ न्यस्ताक्षरामक्षरभूमिकायां

कार्त्स्न्येन गृह्णाति लिपिं न यावत् ॥ तावत्फलानि श्रुतवृद्धयोगात्तावीणपुपायेक्ष सदंडनीतेः ॥ ४६ ॥ उरस्थपं

यांग्रनिवेशभागा प्रौ[illegible]ढीभविष्यन्तमुदीक्षमाणा ॥ संजातलज्जेव तमातपत्रच्छायाच्छले[illegible]नोपजुगूह ल

चतुर्दश[illegible] क्ष्मीः ॥ ४७ ॥ महानसुवानेन [illegible]गोपमानमंबद्धमौर्वीकिणलांछनेन ॥ अस्पृष्टखड्गत्सरुणापि चासीद्रक्षाव

ती तस्य भुजेन भूमिः ॥ ४८ ॥ न केवलं गाढनितं तस्य कालेयमुः शरीरावयवा विवृद्धिं ॥ वंश्या गुणाः खल्वपि

लोककांताः प्रारंभसूक्ष्माः प्रथिमानमीयुः ॥ ४९ ॥ स पूर्वजन्मांतरदृष्टपाराः स्मरन्निवाक्लेशकरो गुरूणां ॥

त्रयीवार्त्तादण्डनीतीः धर्मार्थमोक्षत्रय मर्थान्तर्यो
वार्त्ताशब्देन ... दण्डनीतिमिति कौटिल्यः

कर्द्दरवकेश: ... संचितं
नम्रीकृततवाम ... :

उं त्रिस्त्रिवर्गाधिगमस्य मूलं जग्राह विद्याः प्रकृतीश्च पित्र्याः ॥५०॥ व्यूह्य स्थितः किंचिदिवोत्तरार्द्धमुन्नद्धचूडो ञ्चितसव्य

१०. वं जानुः ॥ आकर्णमाकृष्टसबाणधन्वा व्यरोचतास्त्रेषु विनीयमानः ॥५१॥ अथ मधु वनितानां नेत्रनिर्वेशनीयं म

१०० नसिजतरुपुष्पं रागबन्धप्रवालं ॥ अकृतकविधि सर्वांगीणमाकल्पजातं विलसितपदमाद्यं यौवनं स प्रपेदे

रघु = ॥५२॥ प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः समधिकतररूपाः शुद्धसंतानकामैः ॥ अधिविविदुरमात्यैराहृतास्त

स्य यूनः प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥५३॥ इति श्री रघुवंशे महाकाव्ये कालिदासकृतौ वंशाव

लीनाम अष्टादशः सर्गः ॥१८॥ अग्निवर्णमभिषिच्य राघवः स्वे पदे तनयमग्नितेजसं ॥ शिश्रिये श्रुतवतां

मपश्चिमः पश्चिमे वयसि नैमिषं वशी ॥१॥ तत्र तीर्थसलिलेन दीर्घिकास्तल्पमन्तरितभूमिभिः कुशैः ॥ सौधवास

मुटजेन विस्मरन् संचिकाय फलनिस्पृहस्तपः ॥२॥ लब्धपालनविधौ न तत्सुतः खेदमाप गुरुणा हि मेदि

नी ॥ भोक्तुमेव भुजनिर्जितद्विषा न प्रसाधयितुमस्य कल्पिता ॥३॥ सोधिकारमभिपः कुलोचितं काश्चन स्व

श्रीभुवौ श्रुति विविदुः ... अधिविविदुः ... विविदुः
... विविदुः ...

रामः
१००

विस्मरन् इति स्मृ आदि कर्मणि क्तः यथा नवैवं तरगारः ... विस्मरन्नभवात् ... अकर्मकत्वविवक्षया कर्त्तरि ... कर्म संबन्धे इति कश्चित् विस्मरन्तमस्यात्मीयशादि पाठात्
भ.त्रक्रियया ... कर्मत्वमिति ... विस्मरन्निति पाठः

पङ्कजसतुलामधिरोहतीति नर वकुलवचनात्कर्तरि ल्युट् यद्वा पङ्कजेन यत्तुलाधिरोहणं तदस्यास्तीत्यर्शआदित्वादच्

यथावदर्पयत्समाः ॥ सन्निवेश्य सचिवेष्वतः परं स्त्रीविधेयनवयौवनोभवत् ॥४॥ कामिनीसहचरस्य कामिनस्तस्य
वेश्मसु मृदङ्गनादिषु ॥ ऋद्धिमन्तमधिकर्द्धिरुत्तरः पूर्वमुत्सवमपोहदुत्सवः ॥५॥ इन्द्रियार्थपरिशून्यमक्षमः सोढुमे ६२
कमपि स क्षणान्तरं ॥ अन्तरेव विहरन्दिवानिशं न व्यपेक्षत समुत्सुकाः प्रजाः ॥६॥ गौरवा[illegible]दपि जातु मन्त्रिणां दर्श
नं प्रकृतिकांक्षितं ददौ ॥ तद्गवाक्षविवरावलम्बिना केवलेन चरणेन कल्पितं ॥७॥ तं कृतप्रणतयोनुजीविनः कोम
लात्मनखरागरञ्जितं ॥ भेजिरे नवदिवाकरातपस्पृष्टपङ्कजतुलाधिरोहणं ॥८॥ यौवनोन्नतविलासिनी
स्तनक्षोभलोलकमलाश्च दीर्घिकाः ॥ गूढमोहनगृहास्तदम्बुभिः स व्यगाहत विगाढमन्मथः ॥९॥ तत्र सेकहृत

दीर्घिका क्रीडावापी तासां कृतिकान्तिः ... [illegible]

लोचनाञ्जनैः धौतरागपरिपाटलाधरैः ॥ अङ्गनास्तमधिकं व्यलोभयन्नर्पितप्रकृतिकान्तिभिर्मुखैः ॥१०॥ घ्राणकां
मद्यगन्धकरस्य तमधुगन्धकर्षिणीः पानभूमिरचनाः प्रियासखः ॥ अभ्यपद्यत स वासितासखः पुष्पिताः कमलिनीरिव द्विपः ॥११॥
सातिरेकमदकारणं रहस्तेन दत्तमभि[illegible]लेषुरङ्गनाः ॥ ताभिरप्युपहृतं मुखासवं सोपिबद्बकुलतुल्यदोहदः ॥१२॥

बकुलश्च प्रमदाननासवरूपेण दोहदेन पुष्पतीति प्रसिद्धिः

ॐ

र. वं.

१०१

अंकं मकपरिवर्त्तनेषु स्थिते तस्य निन्यतुरशून्यतामुभे ॥ वल्लकी च हृदयंगमस्वना मंजुवागपि च वामलोचना ॥ १३ ॥
सस्वयं प्रहतपुष्करः कृती लोलमाल्यवलयो हरन्मनः ॥ नर्त्तकीरभिनयातिलंघिनीः पार्श्ववर्त्तिषु गुरुष्वलज्ज
यत् ॥ १४ ॥ चारुनृत्तविगमे च तन्मुखं स्वेदभिन्नतिलकं परिश्रमात् ॥ प्रेमदत्तवदनानिलं पिबन्नत्यजीवदमराल
केश्वरौ ॥ तस्य सावरणदृष्टसंधयः काम्यवस्तुषु नवेषु संगिनः ॥ वल्लभाभिरुपसृत्य चक्रिरे सामिभुक्तविषयाः
समागमाः ॥ १६ ॥ अंगुलीकिसलयाग्रतर्जनं भ्रूविभंगकुटिलं च वीक्षितं ॥ मेखलाभिरसकृच्च बंधनं वंचयन्प्र
णयिनीरवाप सः ॥ १७ ॥ तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु ॥ शुश्रुवे प्रियजनस्य कातरं विप्रल
म्भपरिशंकिनो वचः ॥ १८ ॥ लौल्यमेत्य गृहिणीपरिग्रहान्नर्त्तकीषु [illegible] सुलभासु तद्वपुः ॥ वर्त्तते स्म स कथंचिदा
लिखन्नंगुलीक्षरणसन्नवर्त्तिकः ॥ १९ ॥ प्रेमगर्वितविपक्षमत्सरादायताच्च मदनान्महीक्षितं ॥ निन्युरुत् १०१
सवविधिच्छलेन तं देव्य उज्झितरुषः कृतार्थितां ॥ २० ॥ प्रातरेत्य परिभोगशोभिना दर्शनेन कृतखंडनव्य

संयोगात्तगोत्रे मम पत्न्या भिधानं तत्र स्खलितं तेन प्रमदानारमूचुरिति किं तद्वल्लभजनस्य नाम मया प्राप्य ऽकल्पेम यानवर्वल्लभजन स्य भाग्यम भ्यऽभिलष्यते यथाहं वल्लभान्नाम मया प्राप्तं तथा तद्भाग्यं भवेदिति मम मनो लोलुपमिति वनवेदे = ८

तथा सोऽक्षं महोद्गरे कोपोल्लभ्य रचिकयते प्रायेण भिन्नवदोषप्रसतादिति = १

निर्वर्तनैर्भर्त्सयति स्म न तु वाक्यैः स्वप्नाद पिस्वप्ने सपत्नी नाम भिधानग्रहणमङ्गनानामतिपीडाकारित्वात्केऽपि अङ्गना भर्त्सनविषयैः = १

ॐ

ष्याः ॥ प्रांजलिः प्रणयिनीः प्रसादयन्सोऽदुनो[...]मंथरः पुनः ॥ २१ ॥ स्वप्नकीर्तितविपक्षमंगनाः प्रत्यभैत्सु

रवदंत एव तं ॥ प्रच्छदांतगलिताश्रुबिंदुभिः क्रोधभिन्नवलयैर्विवर्तनैः ॥ २२ ॥ क्लृप्तपुष्पशयनांल्लतागृहानेत्य दूति

कृतमार्गदर्शनः ॥ अन्वभूत्परिजनांगनारतं सोवरोधभयवेपथूत्तरं ॥ २३ ॥ नाम वल्लभजनस्य ते मया प्राप्यभाग्य

मपि तस्य कांक्ष्यते ॥ लोलुपं बत मनो मम मेति तं गोत्रविस्खलितमूचुरंगनाः ॥ २४ ॥ चूर्णबभ्रु लुलितस्र

गाकुलं छिन्नमेखलमलक्तकांकितं ॥ उत्थितस्य शयनं विलासिनस्तस्य विभ्रमरतान्यपावृणोत् ॥ २५ ॥ स

स्वयं चरणरागमादधे योषितां न च तथा समाहितः ॥ लोभ्यमाननयनः श्लथांशुकैर्मेखलागुणपदैर्नितं

बिभिः ॥ २६ ॥ चुंबने विपरिवर्तिताधरं हस्तरोधि रसनाविघट्टने ॥ विघ्नितेच्छमपि तस्य सर्वतो मन्मथेंधनमभूद्व

रतं धू[...]ति ॥ २७ ॥ दर्पणेषु परिभोगदर्शिनीर्नर्मपूर्वमनुपृष्ठसंस्थितः ॥ छायया स्मितमनोज्ञया वधूर्ह्रीनिमीलित

मुखीश्चकार सः ॥ २८ ॥ कंठसक्तमृदुबाहुबंधनं न्यस्तपादतलमग्रपादयोः ॥ प्रार्थय

छायया प्रतिबिम्बेन ते विभ्रमवर्णनम् ... सर्वविधम्य रतिसम्भवात् = ९

मृगणां सुरतसमये सकम्पान् हे रसकावलिता ... रात्रिसम्भाषितं ... लितमिति ... इति

स्रवाञ्छ्रवत्लेन विगलितालकसंबद्धपरवाम ककुंकुम सूलादिना च मुविगलवर्णं ... तल्लतां च कामततं यथा ... स्यादधोमवेच ... तःकरिसम सम्मलं रसलम्भः प्राद्दृत्ता दिपश्च संस्थितस्य रइति ललितेत्यादिना ... यथेदं कयश्च ... योषिदेकवा तो समुत्थितेना य ... विभ्रमा कयर ॥ ... तिकरिरतम् यथा ... मन्मत्तकामन्नृतः स्वयमधोग्र ... तोऽपि यामक्रामतिस्वकरहृतम हसोवल्लभः करिवदेमपुष्यते ... तदृशते ... यदन्दिति = १

न्तशयनोत्थितं प्रियास्तं निशात्ययविसर्गचुंबनं ॥ ३० ॥ प्रेक्ष्य दर्पणतलस्थमात्मनो राजवेषमतिशक्रशोभि

नं ॥ पिप्रियेऽसन न तथा युवा यथा व्यक्तलक्ष्म परिभोगमण्डनं ॥ ३१ ॥ मित्रकृत्यमपदिश्य पार्श्वतः प्रस्थितं तमन

वस्थितं प्रियाः ॥ विद्मते शठ पलायनच्छलान्यंजसेति रुरुधुः कचग्रहैः ॥ ३२ ॥ तस्य निर्दयरतिश्रमालसाः कण्ठ

सूत्रमपदिश्य योषितः ॥ अध्यशेरत बृहद्भुजान्तरं पीवरस्तनविलुप्तकुंकुमं ॥ ३३ ॥ संगमाय निशि गूढचारिणं

चारदूतिकथितं पुरोगताः ॥ वंचयिष्यसि कुतस्तमोवृतः कामुकेति चकृषुस्तमंगनाः ॥ ३४ ॥ योषितामुडु

पतेरिवार्चिषां स्पर्शनिर्वृतिमसावनाप्नुवन् ॥ आरुरोह कुमुदाकरोपमां रात्रिजागरपरो दिवाशयः ॥ ३५ ॥

वेणुना दशनपीडिताधरा वीणया नखपदाङ्कितोरवः ॥ शिल्पकार्य उभयेन वेजितास्तं विजिह्मनयना व्यलो

भयन् ॥ ३६ ॥ अङ्गसत्त्ववचनाश्रयं मिथः स्त्रीषु नृत्तमुपधाय दर्शयन् ॥ स प्रयोगनिपुणैः प्रयोक्तृभिः सं

जघर्ष सह मित्रसन्निधौ ॥ ३७ ॥ अंसलम्बिकुटजार्जुनस्रजस्तस्य नीपरजसाङ्गरागिणः ॥ प्रावृषि प्रमदब

१०२

अङ्गाश्रयं करविन्यासादि सत्त्वाश्रयं स्वेदरोमाञ्चादि वचनाश्रयं गीतादीत्येवंलक्षणं स्त्रीषु उपधाय । मित्रानीय ... मित्राणां सन्निधौ पार्श्वे नर्मकौतुकं दर्शयन् । ...

...आलोकितं ... विलोकितं ...

...आलोकितानीत्यर्थः = २२

न तनत्वात् तिनिविडत्वाच्च मर्मरैः शब्दैः एकतः श्रोणितटैकदेशव्यसनशैथिल्यादृश्यकाञ्चीकर्कटीमन्ता हेमरसना स्वर्ण-
काञ्चीयेभ्यस्तैर्हैमनैर्हिमर्त्तुयोग्यैर्निवसनैर्वस्त्रैः संशाजातजिह्वुरहरन् कीदृशं तमुकुन्दयनेऽस्मुकतेऽपेचपलं ग्रथनेन
लोपः हेमन्तस्याशितलोपस्य

तेषां चाहूतः देशकाल / चन्द्रातोषः श्रायः स वेष्टितो / सिक्तास जायते सुरतेश्रो / पिकृष्टस्यायस्य रागतेति

हितोऽध्यभूत्कृत्रिमाद्रिषु विहारविभ्रमः ॥३७॥ विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे । आचकां
क्ष घनशब्दविक्लवास्ता विवृत्य विशतीर्भुजान्तरं ॥३८॥ कार्त्तिकीषु सवितानहर्म्यभाग्यामिनीषु ललिताङ्गना
सखः । अन्वभुंक्त सुरतश्रमापहां मेघमुक्तविशदां स चंद्रिकां ॥३९॥ सैकतं च सरयूं विवृण्वतीं श्रोणिबिंबमि
व हंसमेखलां । स्वप्रियाविलसितानुकारिणीं सौधजालविवरैर्व्यलोकयत् ॥४०॥ मर्मरैरगुरुधूपगंधिभिर्व्यक्त
हेमरशनैस्तमेकतः । जह्रुराग्रथनमोक्षलोलुपं हैमनैर्निवसनैः सुमध्यमाः ॥४१॥ दक्षिणेन पवनेन संभृतं
प्रेक्ष्य चूतकुसुमं सपल्लवम् । अन्वनैषुरवधूतविग्रहास्तं दुरुत्सहवियोगमङ्गनाः ॥४२॥ ताः स्वमंकमधिरोप्य
दोलया प्रेंखयन्परिजनापविद्धया । मुक्तरज्जुनिबिडं भयच्छलात्कंठबंधनमवाप बाहुभिः ॥४३॥ तं पयोधरनिषि
क्तचंदनैर्मौक्तिकग्रथितचारुभूषणैः । ग्रीष्मवेषविधिभिः सिषेविरे श्रोणिलंबिमणिमेखलैः प्रियाः ॥४४॥
यत्स भग्नसहकारमासवं रक्तपाटलसमागमं पपौ । तेन तस्य मधुनिर्गमात्कृशश्चित्तयोनिरभवत्पुनर्न

परिजनैः सेवकैरप / विद्धया विक्षिप्तया / ...नया ॥

पतिस्वाभाविकभय / व्याजेन दोलालम्बन / स्यागजानमाप्नि... / ... ॥

तपनैः शैत्यसम्पादनेच्छ / ... / ... ॥

शिशिरस्याः
अर्पितस्तिमितदीपदृष्टयो गर्भवेश्मसु निवातकुक्षिषु ॥ तस्य सर्वसुरतान्तरक्षमाः साक्षितां शिशिररात्रयो ययुः ॥ ५
स्याचिताः

कामयाने तिसुन भावस्थितिः । कामयानं प्रवृत्तिर्यस्य सकामस्य वलत्रस्थिता । यद्वा लोकश्च नाश्रुतिरत्र नुमन्तु तालोरिति निर्देशो नः निरमा मशासनमि सतापितत्वानुम भावः

ॐ वः ॥४५॥ एवमिन्द्रियसुखानि निर्विशन्नन्यकार्यविमुखः स पार्थिवः । आत्मशब्दनिवेदितानृतूनत्यवा

यदनङ्गमोहितः ॥४६॥ तं प्रमत्तमपि न प्रभावतः शेकुराक्रमितुमन्यपार्थिवाः । आमयस्तु रतिरागसम्भवो

र० वं० दक्षशाप इव चन्द्रमक्षिणोत् ॥४७॥ दृष्टदोषमपि तन्न सोऽत्यजत्सङ्गवस्तु भिषजामनाश्रवः । स्वादुभिस्तु विषयैर्हृ

विषयेभ्यः

१०३ तस्ततो दुःखमिन्द्रियगणो हि वार्यते ॥४८॥ तस्य पाण्डुवदनाल्पभूषणा सावलम्बगमना मृदुस्वना ॥ यक्ष्म

श्री.

103 णाः परिहानिरायथौ कामयानसमवस्थया तुलां ॥५०॥ व्योमपश्चिमकलास्थितेन्दु वा पङ्कशेषमिव घर्म

पल्वलं ॥ राज्ञि तत्कुलमभूत्क्षयातुरे वामनार्चिरिव दीपभाजनं ॥५१॥ बाढमेषु दिवसेषु पार्थिवः कर्म साध

यति पुत्रजन्मने । इत्यदर्शितरुजोऽस्य मन्त्रिणः शश्वदूचुरघशङ्किनीः प्रजाः ॥५२॥ स त्वनेकवनितास

खोऽपि सन्पावनीमनवलोक्य सन्ततिं । वैद्ययत्नपरिभाविनं गदं न प्रदीप इव वायुमत्यगात् ॥५३॥ तं गृहो सन्तानराम: ... लोके ... १०३

पवन एव सङ्गताः पश्चिमक्रतुविदा पुरोधसा । रोगशान्तिमपदिश्य मन्त्रिणः सम्भृते शिखिनि गू

विषकुम्भ यत्नतिरस्कारिणं गदं तपयोगं प्रदीप इवै

विरहितः प्रकृतिमुख्यानां मन्त्रिणां पतिकोशाध्यक्षादीनां संग्रहो येन तत्तेन तं यैर्मन्त्रिभिः ॥

गर्भे ... कुक्षौ ... हिरितियादयोर्गर्भ ... ॥
तं भावार्थं प्रसवसमयाकांक्षिणीनां प्रजानामन्तर्गूढं क्षितिरिव नभो
बीजमुष्टिं दधाना ॥ ५

ॐ च्चमादधुः ॥५४॥ तैःकृतप्रकृतिमुख्यसंग्रहैराशु तस्य सहधर्मचारिणी ॥ साधुदृष्टशुभगर्भलक्षणा प्रत्य
पद्यत नराधिपश्रियं ॥५५॥ तस्यास्तथाविधनरेन्द्रविपत्तिशोकादुष्णैर्विलोचनजलैः प्रथमाभितप्तः
१०५ निर्वापितः कनककुम्भमुखार्पितेन वंश्याभिषेकविधिना शिशिरेण गर्भः ॥५६॥ मौलैः सार्धं स्थविर
सचिवैर्हेमसिंहासनस्था राज्ञी राज्यं विधिवदशिषद्भर्तुरव्याहताज्ञा ॥५७॥ इति श्री रघुवंशे महाका
व्ये कालिदासकृतौ अग्निवर्णशृङ्गारो नामैकोनविंशतिः सर्गः ॥ शुभमस्तु समाप्तं ॥
समस्तसंवत् ॥ ५० ॥ श्री विक्रमादित्यराज्यसंवत् ॥ १८३१ ॥ वैशाखवदि ५ पंचमी तिथौ भौ
मवासरे लिखितमिदं पुस्तकं मालाकक्रेनात्मपठनार्थं गंगाप्रसाद वसिनाः सीतारामस्य प
ठनार्थं ॥ शुभमस्तु श्रीरामजी सहाय सदाई ॥ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ राम: १०५